M. T. B. COLLEGE, SURAT

Manuscripts Library

No Ref.
Ser. 5536

Title : Gādādhari
(8)

553b

incomplete

C

Gādādhari (?) : Title

Gadādhara? : Author

: Editor

: Year, Vols.

: Publisher

553b Begins & ends abruptly. : Remarks

भिचारइतिभावः।द्वितीयेसंशयाघटितनियमे।निश्चयमात्रेति।मात्रपदेनायोग्यत्वासंशय
व्यवच्छेदः।तेनसंशयनिवेशोव्यभिचारनिराकरणसंभवइतिसूचितं।अग्नेयद्व्यतिरेकनि
श्चयइत्यत्रयत्पदार्थग्राह्याभिन्नत्वविशेषणस्यनिवेशनीयतयाग्राह्यव्यतिरेकनिश्चय
प्रतिबध्येविशिष्टज्ञानमात्रेव्यभिचारोनघटतेइतिशाब्दविशिष्टज्ञानपर्यंतानुधाव
नं।।योग्यताचैकपदार्थेअपरपदार्थनिष्ठाभावाप्रतियोगित्वंतस्यचग्राह्याभिन्नतयात
द्व्यतिरेकनिश्चयप्रतिबध्यत्वमादायव्यभिचारउक्तविशेषणदानेप्यक्षतएवेतिभा
वः।एवंसंशयपदादानेफलोपधानव्यतिरेकनिश्चयमात्रप्रतिबध्यायांतान्निश्चया
जन्यायांप्रवृत्तावपिव्यभिचारोबोध्यः।ननूक्तव्यावृत्तिद्वयदानमसंगतंअव्यभि
चारग्रहादावपिकेनचिद्रूपेणकाचित्कव्यभिचारादनिश्चयस्वरूपयोग्यत्वसत्वे
नसाध्यसत्वादित्यतआह।निश्चयत्वेनेति।जनकत्वस्यसाध्यत्वंनिरूपकतासंबं
धेनबोध्यं।जनकताप्रतियोगित्वमेववाजनकत्वपदेनविवक्षितमतोप्रवृत्तिरूप
पक्षेनिश्चयत्वावच्छिन्नजनकतायाअवृत्तावपिबाधः।अनुमितौपरामर्शादिजनक
तायांपक्षधर्मतावगाहित्वाप्रामाण्यग्रहाभावविशिष्टत्वादेरधिकस्यावच्छेदक
त्वेपितन्निश्चयत्वपर्याप्तावच्छेदकताकत्वपर्यंतानिवेशान्नदृष्टांतासिद्धिः।ननुप्रामा
ण्यनिश्चयस्यप्रवृत्तौपृथक्कारणंनास्ति।भाविज्ञानादौप्रामाण्यनिश्चयेप्यप्रव
त्तेः।तत्तज्ज्ञानजन्यप्रवृत्तौचतत्तज्ज्ञानधर्मिकप्रामाण्यानिश्चयत्वेनहेतुत्वेमानं

तैश्चान्वयनतुक्तः बाधशंकेतिभावः ८

स्वमतदोषाभावादिह ६

प्र० टी० तकार्यकारणभावप्रसंगादिति विषयतासंबंधेन प्रामाण्यनिश्चयविशिष्टार्थज्ञानत्वे
नैव हेतुतातथ्यत्वजनकताघटितसाध्ये व्यभिचारस्त्वत आह निश्चयप्रभावइति यत्त्वग
२ हीताप्रामाण्यकज्ञानत्वेन प्रवर्तकत्वोपगमादेवात्तिप्रसंगभंगेन प्रामाण्यज्ञानस्य ६
निश्चयत्वेनाहेतुत्वाद्बाधइत्याशंकयापक्षान्तएवतारणं तदयुक्तं। तेन रूपेणाप्रवर्तकत्वे
प्रामाण्यज्ञानत्वेन हेतुताया निर्युक्तिकतयास्वतःसिद्धाप्रामाण्यशंकाविरहस्यतेप्रा
माण्यनिश्चयं विनापि प्रवृत्तेर्द्वितीयसाध्येप्यंशतो बाधात्।। मुद्रितं तु विरहेपि व्याप्ति युक्तय
बलात्प्रामाण्यज्ञानस्य हेतुत्वेपि निश्चयत्वेनापि हेतुतायास्तद्बलेन निष्प्रत्यूहतापाता
त् सामानाधिकरण्येन साध्यसिद्धे रूद्दश्यतांस्वीकृत्यांशतोबाधस्यादूषणत्वोपप दू
त्तावपिनप्रतीकारः व्यभिचारान्यथासिद्धिभ्यां प्रामाण्यनिश्चयस्यानुपयोगित्वस्यव
क्ष्यमाणे अप्रामाण्यशंकानिवर्तनद्वाराप्रामाण्यनिश्चयोपयोगितायाव्याप्तिबलेन
साधनशंकाया अवतारायोगात् यादृशी चोपयोगिता निराक्रियते तत्साधनस्यैवोपयु
क्ततया शंकौचित्यात् अनियततायामप्रामाण्यशंकाविरहद्वारोपयोगितायां च व्यभि
चारान्यथासिद्ध्योरकिंचित्करत्वात तन्निराकारणस्याप्रकृतत्वात्। जनकतावच्छेदक
त्वेनोपयोगित्वे अन्यथासिद्धिचतुष्टयराहित्यस्यापेक्षिततया निश्चितप्रामाण्यक
ज्ञानत्वेन प्रवर्तकत्वमतावलंबनेनेनासंगतिः न च व्यभिचारान्यथासिद्धिभ्यां प्रामा
ण्यग्रहस्य पादद्वयुपयोगितानिराक्रियते तस्याबाधेन व्याप्तिसहस्रेणापि नसा

धनसंभवइति मूलासंगतिर्दुर्वारैवेति वाच्यं।। प्रवृत्तिविशेषेण व्यभिचारः कारणता
याः प्रामाणिकत्वे च नान्यथासिद्धिरित्याशयेन तत्साधनसंगतेः निश्चयमात्रे ऽप्रा
बश्यस्वसमानाधिकरणनिश्चयानधिकरणक्षणानंतरमनुत्पत्तिः। अत्र प्रामाण्य
निश्चयदशायामपि तदभावस्यान्यावच्छेदेन सत्त्वे ऽपीश्वरीयप्रामाण्यनिश्चयस्य नि य
त्यतया प्रामाण्यनिश्चयसामान्यानधिकरणक्षणाप्रसिद्धावपि प्रामाण्यनि
श्चयनाशेपि प्रवृत्तिस्थितावपि च न क्षतिः इत्यविवक्षितमिति। अन्यथेश्वरीयप्रा
माण्यनिश्चयजन्यत्वमादायासिद्धसाधनप्रसंगादिति भावः। नदोषः नोक्तव्या
वृत्तिदानासंगतिः अनुमाने सिद्धसाधनशंकया निश्चयत्वेनेत्यादिकमवता
र्यनदोषः नासिद्धसाधनमिति व्याख्यानमयुक्तं। अग्रेतनपथ्याश्रुतइत्यादिवि
वक्षाबीजप्रदर्शनविरोधाद्व्यभिचाराप्रसक्तिं विवृणोति अव्यभिचारग्रहेपीति।
व्यभिचारनिश्चयस्यघ्नाबिल्कव्यभिचारनिश्चयस्य। प्रतियोगिज्ञानेतिद्विने
त्युपलक्षणं। विशेषणज्ञानात्वादिर्नैत्यपि बोध्यं। हेतुत्वात्। स्वरूपयोग्यत्वा
त्। एतेनोच्छृंखलप्रामाण्यग्रहे स्वतस्त्वपक्षोक्तप्रामाण्यसंशयानुपपत्तिरूप
दोषाग्रासादृश्यमापादूषणागणागणाग्रासादित्यसंगतं स्यादतो व्याप्तौ संशया
दिधर्मिणामतर्भाव्य ज्ञानधर्मिक प्रामाण्यग्रहस्योपयोगित्वं साध्यम्। तथा

चाव्यभिचारज्ञानपूर्वंसमानधर्मिकव्यभिचारनिश्चयस्यविरोधेनासंभवेपिनक्ष
त्रिरित्येवध्येयं।एतच्चोपलक्षणं॥काचित्कायोग्यतानिश्चयस्ययोग्यताज्ञानत्वेनस्व
रूपयोग्यतामादायशाब्दबोधेव्यभिचारासंभवोबोध्यः;स्वाव्यवहितपूर्ववर्ति
स्वसमानाधिकरणतन्निश्चयकत्वरूपफलोपधानघटितसाध्येयथाश्रुतेपिव्या
वृत्तिदानसंगतिः।प्रवृत्तित्वावच्छेदेनसमानाधिकरणमघटिततत्साधनेनकाचि
त्कप्रामाण्यनिश्चयात्मकार्थेनिश्चयजन्यत्वंभ्रमगवज्ञानजन्यत्वंवैचाद्यार्थात
रादिदोषस्यापिभ्रांतावकाशाद्युत्याशयेनाह॥वस्तुतइति।निश्चयत्वेनजनकत्वाविव
क्षायामित्युपलक्षणं।निश्चयाभावेओसानरूपतज्जन्यत्वाविवक्षापिबोध्या।सं
शयजन्येसंशयमात्रजन्येतेनसंशयानंतरोत्पन्ननिश्चयेन।द्वितीयक्षणेजनि
तस्यव्यावृत्तिः।द्वितीयकल्पेव्यतिरेकनिश्चयमात्रघटितनियमेइदमुपलक्षणं
संशयमात्रघटितनियमेपिअव्यभिचारनिश्चयेव्यभिचारानिश्चयनिरूपितफ
लोपहितजन्यताशून्येव्यभिचारोबोध्यः;कथंचित्समानधर्मिकाव्यभिचारानि
र्णयस्यकाचित्काव्यभिचारनिश्चयपूर्वंसंभवेपिव्यक्तिविशेषेव्यभिचारस्यव
ज्रलेपत्वात्।निश्चयविषयः;व्यतिरेकप्रतियोगितया।निश्चयविषयोयस्मदा
र्थः।तथाचस्वप्रकारभिन्नस्ययस्यव्यतिरेकनिश्चयोयत्रप्रतिबंधकइतिवक्तव्य

मितिभावः।ग्राह्यप्रतियोगिकाभिन्नत्वेनेतिक्वचित्पाठः।तत्रनिश्चयविषयोव्यतिरेक
एवंव्याप्तिव्यतिरेकज्ञानेतिअव्यभिचारव्यतिरेकोयोव्यभिचारस्तत्संशयानिश्चये
त्यर्थः॥अन्यत्रग्राह्यसंशयस्याप्रतिबंधकत्वेपिअव्यभिचारानिश्चयेतस्यप्रतिबंध
कत्वोपगमादितिभावः।व्याप्तिज्ञानइतिअव्यभिचारनिश्चयाजन्येपीतिशेषः।न
व्यभिचारइति॥अत्यंताभावादिघटितव्याप्तिज्ञानेअन्योन्याभावादिघटितव्य
भिचारज्ञानस्यविरोधितानास्तीतिहृदयं॥अन्यथोक्तविशेषणदानेप्यप्रतीका
रात्।अत्रनकल्पेव्यभिचारस्यसंशयोयदिप्रतिबंधकस्तदासकलव्यभिचार
ज्ञानस्यैवसर्वविधाव्यभिचारज्ञानेविरोधित्वंमणिमंत्रादिन्यायेनावश्यकंग्रा
ह्याभावज्ञानविधयाव्यभिचारज्ञानस्यव्यभिचारज्ञानप्रतिबंधकत्वेग्राह्यांतरा
भाववैलक्षण्यासंभवेनान्यत्रैवान्यत्रापिसंशयप्रतिबंधकतानुपपत्तेरितिग्राह्या
भावेतरैकविधंव्यभिचारधीप्रतिबध्येअन्यविधव्यभिचाराभावग्रहेव्यभिचारा
रोदुर्वारएवइत्यालोच्यग्राह्याभिन्नत्वविशेषणमुपेक्ष्यप्रकारांतरेणाव्याप्तिज्ञा
नेव्यभिचारमुद्धरिष्यन्नुक्तविशेषणापरित्यागेसंशयपदस्यविपरीतनिश्चय
प्रतिबध्यविशिष्टज्ञानमात्रेव्यभिचारणप्रयोजनकत्वमेवसंभवतीत्याशयेन
प्रथमतस्तदेवाह॥वस्तुतोव्यतिरेकेति॥ग्राह्यभागेग्राह्यनिश्चयाजन्येघटा

प्र॰ टी॰ द्विविशिष्टज्ञानमात्रे संशयोपादानस्य तादृशव्यभिचारस्फो(वा)रकत्वे अत: संशयेतीत्यनेना
भिहितेहेतुमाह॥ तत्रेति॥ तन्न घटादिविशिष्टज्ञाने व्यतिरेकनिश्चयोपादानस्य कथमेव
५ व्यावृत्तिरित्याह॥ तावदिति॥ तावन्मात्रे यत्संशय: प्रतिबंधक इत्येतावन्मात्रे च स्वार्थः॥
उपात्तमित्यनंतरं तदुपादाने चेति पूरणीयं॥ तत्र व्याप्तिज्ञाने अप्रतिबंधकत्वान्न व्यभि
चार इति विशेष: मत्पदेनाव्यभिचारमादाय व्यभिचारज्ञाने दर्शित व्यभिचारमाशंक्य
निराकुरुते नन्वेत्यादिना॥ यदभावत्वेति॥ न च प्रमेयत्वादिप्रकारेण व्याप्त्यवगाहिनि पक्ष
धर्मतादिविरहनिश्चये व्याप्त्यभावत्वप्रकारकताविरहादनुमितिप्रतिबंधकव्याप्त्यभा
वज्ञानेन व्याप्त्यभावत्वप्रकारतानियम इति दृष्टांतासिद्धि: एवं किंचित्वेन प्रामाण्याभावा
वगाहिनि कृत्यसाध्यत्वादिनिश्चये प्रवृत्तिप्रतिबंधके प्रामाण्याभावत्वप्रकारकताविरहा
त्स्वरूपासिद्धिश्चेति वाच्यं यदभावावगाहित्वप्रयुक्तस्वप्रतिबंधकताशालित्वं यत्संशयव्यति
रेकनिश्चययोर्यदभावप्रकारतानियम इति विवक्षणात्पक्षधर्मताविरहादिनिश्चयत्वा
दिना अनुमित्यादिप्रतिबंधकतायाश्च व्याप्त्यभावाद्यवगाहित्वाप्रयुक्तत्वात् तत्त्वानुमि
त्यादिप्रतिबंधकव्याप्त्यभावाद्यवगाहिनि ज्ञाने तदभावत्वाप्रकारकत्वेपि क्षतिविरहात्
॥ अथैवं यदभावावगाहिताप्रयुक्तप्रतिबंधकताशालिनि यत्संशये यदभावत्वप्रकारता ५
नियम इत्येतावन्मात्रस्यैव सम्यक्त्वे न व्यतिरेकनिश्चयपदोपादानव्यावृत्त्यसंग
ति: व्यभिचारसंशयस्य व्यभिचाराभावावगाहिताप्रयुक्ताव्यभिचारज्ञानप्रति

त्यभावा॰

बंधकत्वायोगात् यत्पदेन व्यभिचारमुपादाय तदभावज्ञाने उक्तसंशयमात्रघटि
तहेतो: सत्वान्निर्वाहात्॥ न च प्रयोजनांतरविरहेण प्रतिबंधकसंशये यदभावत्व
प्रकारतानियमो न प्रवेश्यते किंतु तादृशनिश्चय एवेत्यियथासन्निवेशेन न निश्च
यांशवैयर्थ्यमिति वाच्यं॥ नियतयो: संशयविपर्यययोरिति लिखितस्याग्रिमस्यव्य
भिचारसंशये व्यभिचाराभावत्वप्रकारकतानियमसंकथनस्यचासंगतेरिति
चेन्न संशयस्य यत्संशयत्वघटकविषयिताप्रयुक्तबंधकताश्रयत्वेनानिवेश
नीयतया विपर्ययोपादानसार्थक्यात् व्यभिचारविषयितायाअपि व्यभिचार
संशयत्वघटकतयात्प्रयुक्तप्रतिबंधकताशालिसंशयस्यापि यत्संशयपदेनो
पादानसंभवात्॥ न चैवमप्येकदेशियदभावत्वप्रकारकतानैयत्यप्रवेशेनैवोप
पत्तौ उभयमत्र तदुपादानमसंगतमेवेति वाच्यं॥ नियतत्वांतस्य संशयेविपर्यये चवै
कल्पिकविशेषणताभिप्रायेण तदसंगते: अथात्र प्रयुक्तत्वं नावच्छिन्नत्वं पक्षध
र्मताविरहत्वाद्यव
र्मताविरहत्वादिना व्याप्त्यभावाद्यवगाहितायाअपि पक्षधर्मताविरहत्वाद्यव
च्छिन्नावगाहितात्वादिना पक्षधर्मताविरहादिज्ञानप्रतिबंधकतायामवच्छेद
कत्वात्तस्याअपि तदवगाहिताप्रयुक्तत्वापत्ते: व्याप्त्यभावत्वादिना अन्यावगा
हिभ्रांतेरपि विरोधितमानास्तवतदभावावगाहितात्वेन तदभावावगाहिता
६

श्री

प्र॰ पि॰ टी॰ याअवच्छेदकत्वविवक्षणासंभवात्॥ अतएव न व्यापकत्वमप्युक्तं प्रतीति साधारणप्र
तिबंधकतायां तदसंभवात्॥ नापि व्यापकत्वं प्रमेयत्वादिना विरोधिविषयिकज्ञाने प्र
६ तिबंधकत्वासत्वेन विरोधिविषयितायास्तद्व्यापकत्वादिति चेन्न तत्र मान्यवृ
त्तियदभावविषयितात्ववच्छिन्नत्वनिवेशनेनानुपपत्त्यभावात्। ननु व्याप्यभाववत्ता
दिप्रकारकत्वस्य व्याप्यभावादिज्ञाननिष्ठप्रतिबंधकतावच्छेदकोटिनिवेशे ए
वानुमित्यादिप्रतिबंधकव्याप्यभावादिज्ञाने तत्प्रकारकत्वानियमनिर्वाहसंभ
वः स एव तु कुतः इत्यत आह। अन्यथेति। अन्यथा तत्र तत्प्रकारकत्वानिवेशेन
नु व्यभिचारसंशये व्यभिचाराभावत्वाप्रकारकेपि व्यभिचारसंशयत्वघटिक
विषयिताप्रयुक्ता व्यभिचारज्ञानप्रतिबंधकत्वसत्वात् उक्तनियमाभावेन व्यभि
चारसंशयमादाय व्यभिचारज्ञाने व्यभिचारानवकाशात् व्यतिरेकनिश्चयोपाद
नमनर्थकमित्यत आह अस्ति चेति व्यभिचाराभावत्वप्रकारतानियम इति भा
वद्वयकोटिकसंशयानभ्युपगमादिति भावः यदि तद्द्विकोटिकोपि न तत्संशयः
प्रामाणिकस्तदा संशयानिष्ठप्रतिबंधकतायां मुख्यविशेष्यतानिरूपितयत्स ६
दार्थभिन्नत्वं तादृशप्रकारतापन्नोविशेषणं देयं तेनाव्यभिचारज्ञानेन व्यभि
चारः प्रकारतापन्नांशे प्रतियोगितया यत्किंचित्प्रकारकत्वनैयत्यमेव

प

विवक्षणीयं। इदं तु सामाधिसौकर्येण। भावद्वयकोटिकसंशयोगमेपि मदभावा
वगाहित्वप्रयुक्तस्य मदभावत्वाप्रकारकवृत्तित्वोभयाभावेन संशयादिनिष्ठप्रतिबं
धकतासामान्यकत्वं निवेश्य विपर्ययोपादानसार्थक्यसंभवात्॰ अव्यभिचार
निश्चये उक्तव्यभिचार एवं विवक्षणे नास्तीति स्फुटयितुं तत्प्रतिबंधके व्यभिचा
राभावज्ञानेऽव्यभिचारभावत्वप्रकारकतानियमं निराकरोति॥ प्रकृते चेति॥
प्रकृते अव्यभिचारज्ञाने अव्यभिचारज्ञानं प्रतीतियावत्॥ प्रतिबंधकत्वेऽस्ति
ते इत्यनेनान्वयः लाघवेनेति॥ एतेन व्यभिचारत्वप्रकारज्ञानत्वेन स्वतंत्रप्रति
बंधककल्पनातोऽव्यभिचाराभावत्वप्रकारकज्ञानं तत्र कल्पयित्वैव व्यभिचा
रज्ञानानुत्पाद उपपादनीय इति शंका निराकृता। प्रतिबंधकज्ञानांतरकल्पनेन
कार्यानुत्पादोपपादने वरं लघुधर्मावच्छिन्नज्ञानत्वेन प्रतिबंधकत्वं कल्पयि
त्वा तदवच्छिन्नमेव कल्प्यतामिति वैपरीत्यमेव युक्तमिति सूचनात्। तत्प्रकारक
त्वेन व्यभिचारत्वप्रकारकत्वेन अनंतरमपि पूरणीयः केचित्तु तत्प्रकारकत्वे
नेति सावधारणम्। न चैवं मदभावत्वप्रकारसंशयानिश्चयसामान्यं यत्र
प्रतिबंधकमित्येतावतैव सामंजस्यं व्यभिचाराभावाभावत्वप्रकारकत्वमात्रे
ण व्यभिचारज्ञानस्याव्यभिचारानिश्चये प्रत्येतमते प्रतिबंधकत्वाभा

प्र॰ मी॰ त्वेनैवोक्तव्यभिचारानवकाशादितिनियमोपादानमनर्थकमितिवाच्यं॥यद्भा
वत्वप्रकारतानियतयोरित्यस्ययदभावत्वप्रकारकताश्रययोरित्यर्थकत्वोपग
८ मेननियमस्याप्रवेशात् व्यभिचाराभावत्वप्रकारकतानियमइत्यत्रापिनि
यमपदस्याश्रयत्वमात्रार्थकत्वादित्याहुः।तच्चिंत्यंएवंसत्यनुपदंनियमखंडे
नायव्यभिचाराभावाभावत्वाप्रकारकज्ञानस्यप्रतिबंधकत्वाभिधानस्यवि
रोधात् व्यभिचाराभावाभावत्वाप्रकारकेज्ञानस्योक्तसंशयादिसामान्यांतर्ग
मात्र तस्याप्रतिबंधकतायाएववक्तुमुचितत्वात्॥व्यभिचाराभावाभावत्वाप्रका
रकेतन्मात्राप्रकारकेएवनिश्चयेप्रतिबंधकेसतितदभावात्।व्यभिचारा
भावाभावत्वमात्रप्रकारकज्ञानस्यप्रतिबंधकत्वाभावेनोक्तहेतोर्व्यभि
चाराभावादित्यग्रिमग्रंथाविरोधइतिचेन्नक्रमक्रमेणैवोपपादितत्वादीदृ
शप्रयासस्यायुक्तत्वात्॥तथाचप्रतिबंधकेसतितदभावात्॥प्रतिबंधिक
तानेतदभावत्वप्रकारकत्वनियमाभावादित्येवाग्रिमफक्किकार्थआदरणी ८
यः॥दृष्टांतासिद्धिमाशंकतेनचेति॥अव्यभिचारात्मकतयाव्याप्तेरिति॥
व्याप्तेरव्यभिचारात्मकतयेतियोजनातदभावत्वप्रकारकतयाव्याप्य

भावत्वप्रकारकत्वमात्रेणनतथात्वं।नानुमितिप्रतिबंधकव्याप्तिव्यतिरेकज्ञानेव्या
प्यभावत्वप्रकारकतानैयत्यंतथाचमूलोक्तदृष्टांतासिद्धिरितिभावः तत्रव्याप्तौविशे
ष्यीभूतस्येतिशेषः सामानाधिकरण्यभागस्यभावतमेति अव्यभिचरितसामाना
धिकरण्यस्यैवाव्याप्तित्वादितिभावः तदभावप्रकारत्वेनैवेति।भावविरहस्यभावा
नात्मकत्वादितिभावः तथाचसामानाधिकरण्यांतस्यैवदृष्टांतत्वेनोक्तत्वात्तत
द्विरोधइतिभावः नन्वेवमपिव्याप्तिनिश्चयत्वेनानुमितिहेतुतावादिनातद्व्यति
रेकज्ञानाभावस्यतद्धेतुत्वानुपगमात् दृष्टांतासिद्धिर्दुर्वारैवनचप्रयोजकीभू
ताभावप्रतियोगित्वंप्रतिबंधकत्वंतत्रव्याप्तिव्यतिरेकज्ञानस्याक्षतत्वंतदभावस
व्याप्तिनिश्चयजनकत्वेनानुमितिप्रयोजकत्वादितिवाच्यंएवमपिप्रामाण्यव्यति
रेकज्ञानाभावस्यार्थनिश्चयोपपादकस्यप्रवृत्तिप्रयोजकतायादुर्वारत्वात्मूले
वक्ष्यमाणहेत्वसिद्धेरसंगतेः नचप्रतिबंधकत्वमत्रकार्णीभूताभावप्रतियोगि
त्वंप्रयोजकीभूताभावप्रतियोगित्वंवा॥तत्राद्यपक्षेमूलेदृष्टांतासिद्धेरप्युपल
क्षिकास्वरूपासिद्धिरभिहिताद्वितीयेत्वप्रयोजकत्वंदूषणमभिप्रेतमिति
नाग्रिममूलविरोधइतिवाच्यंएवमपिव्याप्तिव्यतिरेकसंशयस्यग्राहकसं
शयत्वेनव्याप्तिनिश्चयविरोधितयाअन्यथाव्याप्तिनिश्चयेएवव्यभि

प्र॰टी॰ चारस्य दुर्वारत्वमात्तदभावस्यानुमितिप्रयोजकतायाअपिदुर्धरत्वेनदृष्टांत
८ सिद्धेः प्रयोजकीभूताभावप्रतियोगित्वरूपप्रतिबंधकतानिवेशोपिदुर्वारत्वात्।
नचप्रयोजकत्वंनियतपूर्ववृत्तित्वमेवएवंचव्याप्तिव्यतिरेकसंशयस्यव्याप्तिनि
श्चयाप्रतिबंधकत्वेपिव्याप्तिनिश्चयजन्यकार्येतदभावस्यनियतपूर्ववृत्तित्वम
व्याहतमेवेतिनदोषइतिवाच्यम् व्याप्तिसंशयानंतरक्षणोत्पन्नस्मरणाद्यात्म
कव्याप्तिनिश्चयजन्यानुमितिपूर्वक्षणेतत्संशयाभावस्याप्तत्वेनानुमितौत
स्यानियतपूर्ववर्तितायाअप्यसिद्धेः अत्रकेचित्॥प्रयोजकत्वंकारणतावच्छेद
कत्वंएवंचव्याप्त्यभावप्रकारसंशयभेदस्यानुमितिकारणतावच्छेदकतयाप्रयो
जकभेदप्रतियोगित्वरूपंव्याप्तिव्यतिरेकसंशयस्यप्रतिबंधकत्वमक्षतंनच
विरोधावगाहिव्याप्तिव्यतिरेकज्ञानभेदस्यैवनिश्चयत्वघटकतयाकारणता
वच्छेदकत्वम्व्यतिरेकज्ञानसामान्यस्यप्रतिबंधकत्वमसिद्धमेवेतिवाच्यं॥
विरोधावगाहिव्यतिरेकज्ञानसामान्यस्यैवव्याप्तौनिवेशनीयत्वात्।प्रयोज
कत्वंवाकारणकारणतावच्छेदकसाधारणं।अनुमितावपिव्याप्तिविधयोहेतुता
यांनसंशयान्यत्वनिवेशः विशेष्यविशेषणभावेविनिगमनाविरहात्॥ अ
पितुतद्व्यतिरेकज्ञानाभावत्वेनकारणतांतरमुपेयमितिनानुपपत्तिः॥

अगृहीताप्रामाण्यकज्ञानत्वेनप्रवर्तकत्वान्नस्वरूपासिद्धिरित्याशयः॥इदमेवा
न्यथासिद्ध्यानिराकृत्यहेत्वासिद्धिरुद्धाव्यिष्यते॥यद्यप्यर्थनिश्चयहेतुतायाम
प्रामाण्यग्रहाभावस्यावच्छेदकताप्रामाण्यनिश्चयस्याहेतुतामतेअवश्यमेवस्वी
कार्याअन्यथाप्रामाण्यसंशयानंतरंसामग्रीसत्वेनार्थसंशयस्यावश्यकत्वे
नार्थनिश्चयासंभवेपिप्राथमिकादर्थनिश्चयादप्रमात्वेनगृहमाणात्प्रवृत्त्या
पत्तेर्दुर्वारत्वात्॥नचफलेच्छाफलसाधनताज्ञानाप्रामाण्यज्ञानानांयुगप
दनवस्थानान्नेयमापत्तिरितिवाच्यं॥दैवाज्जनकज्ञानस्यैवयत्रस्वास्मिन्न
प्रामाण्यावगाहितातत्रैवापत्तिसंभवात्॥तथाप्यप्रामाण्यज्ञानाभावस्य
जनकतावच्छेदकत्वेप्रमाण्यनिश्चयस्यस्वतंत्रहेतुतायानिर्युक्तिकतया
अप्रयोजकत्वएवमूलतात्पर्यं॥नचप्रामाण्यनिश्चयत्वेनप्रवर्तकतावा
अप्रयोजकत्वएवमूलतात्पर्यं॥ नचप्रामाण्यनिश्चयत्वेनप्रवर्तकतावा
दिनामप्रामाण्यग्रहाभावस्यजनकतावच्छेदककोटिनिवेशनमफलम्।अति
प्रसंगस्यप्रमात्वनिश्चयहेतुत्वेपिवारणादितिशंकैवनावतरतीतिवाच्यं॥
यतःशंकितुःप्रमात्वनिश्चयत्वेनहेतुतायांनतात्पर्यमपितुप्रामात्वनिश्चय
स्यसर्वत्रफलोपधानापेक्षायामेवतत्प्राप्ताप्रामाण्यग्रहोभावस्यजनकतावच्छे

प्र.मे.टी. दकत्वेप्रामाण्यज्ञानस्य ज्ञानत्वेनैवहेतुतेतितदभावस्यतथात्वंसफलमितिव
९ दंति॥इदंतुतत्त्वंयन्निश्चयंविनायत्संशयव्यतिरेकनिश्चयकालेनियमतःफ
लानुत्पादस्तन्निश्चयहेतुरित्येवनियमः॥यन्निश्चयंविनेत्येतावन्मात्रोक्तौ
संदिग्धस्वरूपासिद्धिरितिव्यतिरेकज्ञानोपादानं॥उक्तासिद्धिवारणायय़न्नि
श्चयंविनेतिनियतफलानुत्पादानुरोधेनानिश्चिताप्रामाण्यकतद्व्यतिरेकज्ञा
नाभावकारणत्वापेक्षयाअगृहीताप्रामाण्यकतन्निश्चयत्वेनलाघवात्कार
णत्वमुचितंअन्यथागौरवादित्ययंव्याप्तिग्राहकतर्कः अत्रचप्रामाण्य
निश्चयस्याहेतुत्वेपिप्रवृत्तौ तद्व्यतिरेकज्ञानाभावस्यन कारणतोपपत्ते॥
अर्थनिश्चयरूपकारणाभावादेवाप्रामाण्यज्ञानदशायांप्रवृत्तिवार
णासंभवादितिव्याप्तेरप्रयोजकत्वमितितत्संदेहे सतीत्यादिनोद्भा
वनीयम्॥॥तत्रतयोरप्रतिबंधकत्वादित्यस्यचैतयोः॥ कारणी
भूताभावप्रतियोगित्वरूपप्रतिबंधकत्वानुपगमादित्येवार्थः॥
तथाचनोक्तव्याप्तिग्राहकयुक्त्यवकाशइतिनकाश्चिद्विरोधः अत्र
यद्यपिप्रामाण्यनिश्चयस्याहेतुत्वेप्राथमिकार्थनिश्चयारप्रामाण्यज्ञानासंदि

पा
वारणाप्रामाण्यज्ञानाभावस्यकारणत्वंकारणतावच्छेदकत्वंवाआवश्यकमित्युक्तयुक्त्याप्रामाण्य
सं निश्चयोहेतुरेवेतिसमाधानंभवति॥तथाप्यप्रामाण्यज्ञानाभावहेतुतापक्षेकारणतावच्छेदकगौ
रवेपिधर्मिणस्तत्रनियतपूर्ववर्तितायाश्चक्लृप्तत्वात्प्रामाण्यनिश्चयहेतुतामतेचतत्कल्पनाधि
क्यादभावहेतुतापक्षोपिसाधुःसंभवतीत्यालोच्यप्रामाण्यनिश्चयस्याहेतुत्वमभ्युपेत्याप्रा
माण्यज्ञानानिवर्तकतयाप्रामाण्यनिश्चयोपयोगितांनैयायिकादिसिद्धांतसिद्धामुपदर्शयांक्षे
पसंगमयीष्यतेनेत्यादिना॥स्वतएवेतिमूलंस्वेनैवेत्यर्थःनिरूपणमवगाहनंस्वपदंचप्राभा
करकथायांप्रामाण्याश्रयज्ञानरूपस्वपरमेवमिश्रकथायांस्वकीयानुव्यवसायपरंभट्टक
थायांज्ञातताद्वारास्वप्रयोज्यज्ञाततालिंगकानुमितिपरं॥अथवास्वतएवप्रामाण्यनिरूप
णंप्रामाण्यज्ञानंस्वप्रयोज्यमेवस्वंचमिश्रभट्टयोर्मतेव्यवसायएवगुरुमतेस्वकीयासामग्री
ज्ञानप्रामाण्यमित्यत्रप्रामाण्यपदस्यनानार्थत्वेपितद्वतितत्प्रकारकज्ञानत्वरूपतदर्थस्ये
वपक्षतयाज्ञानीयत्वस्यतत्राव्यावर्तकत्वेनज्ञानपदवैयर्थ्यमितिपूर्वपक्षेप्रमाणपदस्यभा
वकरणव्युत्पत्तिभ्यांप्रमायांप्रमाकरणेचप्रयोगस्याविशेषात्॥ज्ञानपदादानेप्रामाण्यपद
स्यप्रमाकरणतापरत्वभ्रमःस्यात्तद्वारणायज्ञानपदंज्ञानपदोपादानेज्ञानस्यैवप्रामा
ण्यमितिसमासेनान्वयितावच्छेदकावच्छेदेनज्ञानत्वनैयत्यविवक्षयाप्रमाकरणत्वस्याबाधि
तत्वेचसमभिव्याहृततन्नैयत्यान्वयासंभवात् भ्रमनिरासइतिविशेषतात्पर्यग्राहकतयाज्ञा
नपदसार्थक्यं।अथवाप्रमाकरणत्वसाधारणप्रामाण्यपदार्थत्वेनतद्वतितत्प्रकारकत्वपरं

 प्रामाण्यपदंनतुविशेषरूपेणतथाचज्ञानपदानुपादानेप्रमाकरणत्वेबाधइतितदुपादानंतद्व
लाक्षण्येनरूपेणप्रामाण्यपदार्थतातद्रूपेणज्ञानत्वनैयत्यविवक्षयाबाधनिरासइतितत्सार्थकम
१० तेतिकेचांचित्समाधानंनिराकर्तुमुपन्यस्यति ॥ करणेति ॥ करणत्वभ्रमः प्रमाणपदतात्पर्यस्यप्र श्री
माकरणेभ्रमः निरासार्थमित्यनंतरंसामान्यरूपेणपक्षत्वेंऽशतोबाधनिरासार्थंचेतिपूरणीयं ॥
तेनात्रसामान्यपरत्वइत्यादिवक्ष्यमाणदूषणसंगतिः ननुज्ञानपदस्यकरणल्युडंतस्यज्ञानक
रणार्थकतयातस्यतत्परत्वभ्रमदशायांतत्समभिव्याहारेणापिप्रमाणपदस्यनकरणपरत्व
भ्रमनिरासइत्यतआह ॥ ज्ञानपदस्येति ॥ भाववुत्पन्नस्येतिभावेभूरिप्रयोगादित्यर्थः अ
तस्तत्रनकरणपरत्वभ्रमइतिभावः ॥ प्रथमपक्षं दूषयति ॥ प्रामाण्यपदस्येति ॥ एतदनंतरं
प्रवर्तकज्ञानविषयप्रामाण्यपदार्थमधिकृत्यैवाक्षेपेणतस्यैवप्रकृततयेतिपूरणीयं ॥ विशेषप
रत्वेविशेषपरत्वनिश्चयेसतिभ्रमासंभवात् ॥ अन्यपरत्वभ्रमासंभवात् । द्वितीयंदूषयति ॥ सा
मान्यपरत्वइति ॥ अंशतोबाधात्प्रामाण्यपदार्थविशेष्यावृत्त्यप्रकारकज्ञानत्वादौबाधप्रसंगा
त् ॥ क्वचिद्विशेष्यावृत्त्यप्रकारकत्वादिसामान्यपरत्वइतिपाठः तत्रविशेष्यावृत्तीत्यभिधानमं
शतोबाधस्फुटीकरणायएतच्चविशेष्यावृत्त्यप्रकारकत्वविशिष्टेपिप्रमापदस्यशक्तिरित्य
भिमानेन ॥ वस्तुतस्तुशक्त्याप्रामाण्यपदेनप्रामाण्यपदार्थत्वेनानुपस्थापनाल्लक्षणादरे १०
प्रमापदप्रवृत्तिनिमित्तत्वेनप्रमाकरणत्वव्यावृत्तेनैवपक्षत्वमुचितंतथासत्यपिज्ञानपदव्या
वृत्तेरग्रेवक्ष्यमाणत्वादितिदूषणंद्रष्टव्यं ॥ अत्रव्याख्यांतरंतुच्छत्वादुपेक्षितं ॥ स्वयंव्याव
ज्ञानात्मवृत्तितानवच्छेदकप्रामाण्यपदार्थतावच्छेदकत्वेनपक्षताकरणमपि

अप्रमेयंप्रविशेष्यविशेषणादुपेक्षितं

त्तिंदातुमुपक्रमते ॥ वस्तुतइति इच्छावृतितद्वतितत्प्रकारकत्वव्यावर्तकतयाज्ञानपदंसार्थकयिष्यन्
प्रामाण्यपदस्यप्रमाणभावपरत्वेइच्छायाःप्रमाणपदार्थत्वविरहेणतत्साधारणधर्मस्यप्रामाण्यपदे
नालाभात् ॥ ज्ञानपदानर्थक्यमितिशंकयाप्रथमंतन्निराकरोति ॥ प्रामाण्यपदमिति ॥ प्रमाणमात्रवृ
त्तिधर्ममात्रपरंभावप्रत्ययबलात्प्रमामात्रवृत्तिसकलप्रमावृत्तिधर्मपरमित्यर्थः ॥ अंशतोबाधादि
ति ॥ भ्रमान्यसप्रकारकज्ञानत्वादेरपितथात्वादितिभावः ॥ ननुप्रकृत्यर्थतावच्छेदकधर्मएवभावः ॥
नतुतत्समनियतधर्मांतरं ॥ तथाचतद्वतितत्प्रकारकानुभवस्यैवप्रमापदवाच्यतयाताद्दशानुभ
वत्वमेवप्रामाण्यंनतुभ्रमान्यज्ञानत्वादिकमित्यतआह ॥ अनुभवत्वेति ॥ विवादास्पदादिति ॥ अ
नुभवत्वस्यतन्मतेस्मृत्यन्यज्ञानरूपतयातेषामपिपरतोग्राह्यत्वादितिभावः ॥ तथाचतावत्पर्यंत
स्यापिनोपादानसंभवइतिभावः ॥ मात्रपरमिति ॥ मात्रपदेनानुभवत्वव्यवच्छेदः अगत्याएकदेशे
लक्षणोपगंतव्येतिभावः ॥ इदमत्रचिंत्यं धातोर्ज्ञानत्वविशिष्टवाचकतयाप्रकर्षद्योतकप्ररूपोप
सर्गसमभिव्याहाराद्याथार्थ्यरूपप्रकर्षविशिष्टज्ञानत्वमेवशक्तिलभ्यंस्मृतिकरणेतांत्रिकाणां
प्रमाणव्यवहारविरहादनुभवत्वघटितधर्मावच्छिन्नेपरिभाषैवएवंचात्रशाक्यार्थमुपेक्ष्यज्ञा
नपदोपादानमयुक्तमितितच्चतन्मात्रंवाइच्छावतिइ ॥ इच्छावत्यपि ॥ एतदनंतरमतइतिशेषः न
यथोक्तसाध्यवदिति ॥ नन्यावत्स्वाश्रयग्राहकग्राह्यत्वरूपसाध्यवदित्यर्थः ॥ इच्छायाअपि
स्वाश्रयत्वादिच्छाग्राहकेनचतदग्राहादितिभावः ॥ ज्ञानपदेदत्तेपिकुतोनबाधः ज्ञानेच्छयोःप्रामा
ण्यस्यैक्येनपक्षासंकोचादित्यतआह ॥ तेनेति ॥ ज्ञाननिष्ठस्येति ॥ ज्ञानवृत्तित्वविशिष्टस्येत्य

प्र॰वि॰टी॰ र्थः।लाघवात्साध्यघटकाश्रयविशेषणतयालाभात्स्वपदस्यसमभिव्याहृततादृशाविशिष्टार्थक
११ त्वादितिभावः॥ननुसाध्यस्थज्ञानपदस्यस्वाश्रयार्थकत्वएवोक्तरीत्याज्ञानेच्छाप्रामाण्याभेदेबाधप्र
सक्तिर्नतुयथाश्रुतार्थपरत्वेइच्छावृत्तित्वेपिप्रामाण्यस्यज्ञानग्राहकेनग्रहनियमात्॥तदेवतु
कुतइत्याशंक्याकते॥नचेति॥ज्ञानेच्छासाधारण्येपीतियथाज्ञानस्यतदाश्रयत्वंतथाइच्छा
यास्तदाश्रयत्वेपीत्यर्थः॥केचित्तुतत्त्वेच्छावृत्तीत्यादिग्रंथोयथाश्रुतएवज्ञानेच्छयोःप्रामाण्य
भेदपरतयासंगमनीयःप्रामाण्यस्यैक्याभिप्रायेणायंबाधोद्धारशंकानचप्रामाण्यभेदेइच्छा
वृत्तिप्रामाण्येज्ञानग्राहकग्राह्यत्वरूपसाध्यस्यापिबाधेननयथोक्तसाध्याद्वदितिग्रंथस्यता
दृशसाध्यपरत्वात्॥पूर्वमिच्छाग्राहकाग्राह्यत्वेनबाधस्याप्रदर्शितत्वादाशंकामध्येइच्छावृ
त्तित्वेनाग्रहेपीत्यंतेनइच्छाग्राहकाग्राह्यत्वाभ्युपगमस्यासंगतिप्रसंगइतिवाच्यं॥यावज्ज्ञा
नग्राहकग्राह्यत्वंसाध्यमस्तीत्यत्रज्ञानपदस्यस्वाश्रयपरतयाज्ञानग्राहकयावद्ग्राह्यत्वसत्वे
पिनसाध्यसत्वमित्यवांतरशंकांतरोद्धारायतत्पूर्वंयथाश्रुतज्ञानपदार्थपरित्यागेप्रयोजन
विरहेणेतिपूरणीयतयातत्संगतेरित्याहुः॥ज्ञानभागेज्ञानग्रहेपक्षीकृतस्यप्रामाण्यस्यग्र
हनियमात्॥भानानियमात्॥यथाश्रुतेबाधादितिक्वचिदपिप्रामाण्येघटत्ववतिघटत्वप्र ११
कारकत्वादिरूपेसकलघटपटादिज्ञानग्राहकग्राह्यत्वस्यासत्वादितिभावः॥अग्रिमेति॥तृ
तीयेत्यर्थः॥विशेषणेत्यस्यअप्रामाण्याग्राहकस्येत्यादिःप्रक्षेपाप्रक्षेपाभ्यांभेदसंभवा

दित्यन्वयःअतएवेतिविशेषणप्रक्षेपेणबाधवारणेऽपपक्षासंकोचःतदप्रक्षेपेणबाधप्रसक्तेरग्रेपक्षसं
कोचः॥अप्रामाण्यग्राहकसामग्र्यग्राह्यज्ञानप्रामाण्यमात्रस्यपक्षत्वेअतोपिभेदसंभवादित्यर्थः॥तथा
चेति॥साध्यस्थज्ञानपदस्यस्वाश्रयपरत्वेचेत्यर्थः॥ज्ञानाविशेषणेपक्षीभूतप्रामाण्येज्ञानवृत्तित्व
स्याविशेषणत्वेबाधएवेति॥तद्वतितत्प्रकारकत्वाश्रयेच्छाग्राहकेनप्रामाण्याग्रहादितिशेषः।तदर्थं
बाधनिवर्तकं ननुज्ञानग्राहकेणेच्छालौकिकप्रत्यक्षसामग्र्यापिप्रामाण्यग्रहेबाधकाभावः।नचेच्छा
याअनुपनायकत्वात्तद्विषयोपनयासंभवेनतत्प्रत्यक्षेनप्रामाण्यज्ञानसंभवःइच्छाजनकज्ञानस्यतन्म
तेसामान्यलक्षणाप्रत्यासत्तिविरहेणासिद्धतद्विषयाविषयकत्वात्तद्विषयकत्वेपिविनश्यदवस्थज्ञा
नजन्येच्छाप्रत्यक्षेविषयोपनयस्यततोसंभवादितिवाच्यं।विषयानुपरक्तसविषयकपदार्थप्रत्य
क्षानुपगमेनेच्छाप्रत्यक्षेविषयभाननियमात्।विषयाभासकसामग्र्यसत्वेतत्प्रत्यक्षस्यैवानुदया स
दित्यतआह॥यदिविति॥विषयोपनयसंभवेप्रामाण्यभानेबाधकविरहेपियदितेषांज्ञानग्रहए
वस्वतःप्रामाण्यभानमितिसिद्धांतस्तदाप्रकारितायांशेलौकिकप्रामाण्यभानेज्ञानांशेलौकिकत्वनि
यमेनज्ञानलौकिकप्रत्यक्षसामग्र्याःप्रयोजकत्वमभ्युपेत्यापिविनैवातिरिक्तकार्यकारणभावक
ल्पनंतन्निर्वाहसंभवेनेच्छाग्राहकसामग्र्याःप्रामाण्यग्राहकत्वेविवादस्सूचनाययदीत्युक्तं।तद्धर्म
ग्रहस्तदीयप्रामाण्यग्रहस्तदापिज्ञानांतर्भावेस्थितियोजनापक्षइतिशेषःकथमित्याकांक्षायामा
ह।तथापीति।इच्छाग्राहकेणप्रामाण्यग्रहोपगमेपीत्यर्थः॥अगृहीतेति।अप्रामाण्यग्राहकसाम
ग्र्यादिनियमेनागृहीतंप्रामाण्यंयत्रैवपक्षतंयज्ञानंयावत्तादृशीतत्समानविषयेच्छातत्प्रामाण्यं

प्र॰नि॰टी इत्यर्थः। समानविषयेति स्वरूपकीर्तनं॥ बाध इति॥ स्वाश्रयज्ञानादिग्राहकेण तदग्रहादिति भावः
इति॥ अतः ज्ञानपदे दत्तेऽपि च यादृशज्ञानजनकसामग्रीग्राह्यत्वं साध्यं तादृशज्ञानविषयज्ञानार्थकत्वा
१२ न्न बाध इत्याशयः। तदा ज्ञानांतर्भावोऽस्त्विति पाठे तदंतायदि लिप्यादिकांका तथापि इत्याद्युत्तरं
बाध इतीत्यनंतरं ज्ञानपदोपादानमिति शेषः केचित्तु तदा ज्ञानांतर्भावोऽप्यस्तु॥ साध्येऽपि ज्ञानांतर्भा
वः पक्षस्थज्ञानपदसार्थकतायास्तु स्वाश्रयज्ञानग्राहकग्राह्यत्वं साध्यमस्त्विति यावत्। तथापि त
था च तदुपादाने अगृहीतप्रामाण्यकस्य ज्ञानं तदीये तत्समानविषयके छावृत्तितया गृह्यमाणे बा
ध इति ज्ञानवृत्तितया गृह्यमाणत्वलाभाय ज्ञानपदमिति व्याचक्रुः। पक्षे ज्ञानपदोपादानेऽपि साध्ये
ज्ञानवृत्तित्वविशिष्टतद्वृत्तितत्प्रकारकत्वाश्रयत्वपर्यंतानिवेशे बाधवारणासंभवात्तत्र तन्निवे
क शोऽपक्षे ज्ञानविशेषणमव्यार्थमिति तस्येच्छाप्रामाण्यव्यावर्तकत्वमुपपादयितुं ज्ञानेच्छयोः प्रा
माण्यभेदं व्यवस्थापयति। वस्तुतस्त्विति। ज्ञानेच्छयोरिति। यथा नैयायिकमते इच्छायां न स्वाभा
न विकं सविषयकत्वं किंतु याचितमण्डनन्यायेन जनकज्ञानविषयतयैव तथात्वमिति ज्ञानप्रामाण्यमे
व तत्प्रामाण्यमिवैति ज्ञानपदस्य प्रामाण्यांतरव्यावर्तकत्वासंभव इत्यथा न तन्मते तन्मते हि इच्छाजनक
ज्ञानस्येच्छाविषयासिद्धविषयकत्वविरहेण तदीयविषयतयेच्छायास्तद्विषयकत्वानुपपत्तेरिति॥
इच्छायामपि स्वाभाविकी विषयिता स्वीकार्या सा चेच्छास्वरूपतया इच्छाजनकज्ञानस्वरूपज्ञान १२
निरूपयिता ततोऽभिन्नैवेति तदघटितं तत्प्रामाण्यमपि भिन्नमेवेति स्वाश्रयज्ञानाप्रसिद्धे ज्ञानघटि
तसाध्यमंत्रातो बाधितं तत्राशक्यग्रह इत्यर्थः अत्र चेच्छाग्राहकेण प्रामाण्यग्रहे पक्षे ज्ञानवि

शेषणसार्थक्याय साध्ये ज्ञानांतर्भावः प्रक्षालनाद्धीति न्यायेनाप्युक्त इत्यस्वरसः॥ कल्पांतरानुस
रणबीजं॥ नन्वज्ञानपदोपादानेऽपि ज्ञानेच्छयोरिव ज्ञानव्यक्तीनामपि भेदे नोक्तरीत्या प्रामाण्यभेद इति एक
ज्ञानप्रामाण्ये अन्यदीयप्रामाण्याश्रयग्राहकाग्राह्यत्वाद्बाध इति। प्रामाण्यपदार्थस्तत्तद्व्यक्तित्वेन साध्ये
पक्षे च निवेशनीय इति ज्ञानविशेषणवैयर्थ्यं दुर्वारमेवेति वाच्यं॥ स्वाश्रयग्राहकयावत्सामग्र्यग्राह्य
प्रामाण्यत्वं ज्ञानवृत्तित्वविशिष्टतावच्छेदककूटस्य स्वाश्रयज्ञानग्राहकग्राह्यं यद्यत्तावदन्यतमत्वस्य स्व
ग्राहकयावद्ग्राह्यत्वविशिष्टाधेयतासंबंधेन ज्ञानस्येव वा साध्यतयोक्तबाधवारणात् विषयभेदेन प्रामा
ण्यभेदात् ज्ञानेच्छयोर्नैकं प्रामाण्यमिति यथाश्रुतार्थो न साधुः इच्छाजनकज्ञानस्येच्छासमानविषय सिद्धे
कत्वविरहेऽपि विषयसिद्ध्युत्तरकालीनतद्विषयकज्ञानसमानविषयकत्वस्येच्छायामक्षतत्वात्॥
न च यद्विषयकेच्छाविषयसिद्ध्युत्तरमपि तत्समानविषयकज्ञानं न जातं तत्प्रामाण्याश्रयज्ञानाप्र
सिद्धिर्दुर्वारैवेति वाच्यं॥ तत्प्रामाण्यस्याज्ञाने बाधग्रहासंभवात्॥ अज्ञायमानज्ञानप्रामाण्यतु
ल्यत्वाच्च। ज्ञाने च तज्ज्ञानस्यैव तदाश्रयत्वात्॥ मुख्यविशेष्यतायाः प्रामाण्याघटकत्वात्। केचि
त्तु ज्ञानादिव्यक्तिभेदेन प्रामाण्यभेदः विषयतायाः स्वरूपातिरिक्तत्वात्तथापि ज्ञानेच्छयोर्नै
कं प्रामाण्यं ज्ञानविषयतात उद्देश्यतारूपेच्छाविषयताया विलक्षणत्वात्। न चेच्छा मुख्यविशेष्यते
वोद्देश्यतेति वाच्यं॥ अहं सुखी स्यामित्यत्र सुखादेरनुद्देश्यतापत्तेरिति ज्ञानपदानुपादाने तद्वृत्तित
त्प्रकारकत्वाश्रयज्ञानस्याप्रसिद्धेः इच्छावृत्तिप्रामाण्यवत्तया ज्ञानात् यावत्तदाश्रयज्ञानग्राहकग्रा
ह्यकत्वं यावदंतर्गतेन तद्वृत्तितत्प्रकारकत्वाश्रयज्ञानग्राहकेन ग्राह्यत्वमिच्छावृत्तिप्रामाण्ये बाधि

इच्छाप्रत्यक्षे विषयो न विषयः किंतु तटस्थज्ञानांतरं विषयः प्राकृतिमानसप्रत्यक्षे पाकः यथावासं ज्ञानविशिष्टज्ञाने संज्ञाविषयविशिष्टेच्छाव्यवहारः तटस्थज्ञानांतरविषयविषयासंसर्गग्रहादित्याशयः

प्र·मि·टी·न· तमितिवर्णयंतितदपिन॥ इच्छादृत्युद्देश्यतायाविशेष्यतात्वविरहेण प्रामाण्याघटकतयाविशेष्यतायाश्चज्ञानसाधारणतयाज्ञानेच्छादृत्तिप्रामाण्यैक्यसंभवात्॥ अन्येतुइच्छाग्राहकसामग्र्याः प्रामाण्यग्राहकत्वमेव निराकरोति॥ वस्तुतस्त्वित्यादिनाज्ञानेच्छयोरिति॥ ज्ञाने इच्छायांच प्रामाण्यग्राह

१२ कसामग्र्यानतुल्यत्वमित्यर्थः॥ इच्छापूर्वकालीनज्ञानतदिच्छयोः विषयभेदादिति। तथाचेच्छायाअ

चे नुपनायकत्वात् सिद्धविषयकस्यज्ञानस्यैच्छायामसिद्धविषयोपनायकत्वासंभवान्नप्रामाण्यग्राहकसामग्रीतिभावः। इच्छाप्रत्यक्षंतुविषयाविषयकमेव। तटस्थज्ञानांतरविषयविषयासंसर्गाग्रहाद्विषयविशिष्टव्यवहारइत्याशयः। तदाश्रयज्ञानाप्रसिद्धेः तदाश्रयेच्छायाः प्रामाण्यप्रकारेणज्ञानासंभवात्॥ ज्ञानग्राहकेति॥ ज्ञानजनकेत्यर्थः इच्छाप्रत्यक्षेविषयाभासानेतद्ग्राहकसामग्रीसाध्यघटिकेवनाविषयविशिष्टस्वाश्रयग्राहकसामग्र्याएवविवक्षणीयत्वादित्येतत्कल्पेनिर्भरबीजं। अनुभवत्वगर्भप्रामाण्यपक्षेप्रामाण्यपदस्यतद्वतितत्प्रकारकानुभवत्वरूपार्थपरत्वस्तत्रमेस्मृतिव्यावृत्तपक्षलाभेपक्षस्यस्वतस्त्वविवादविषयस्यस्मृतिव्यावृत्तस्यलाभेस्मृताविति। तन्मतेमीमांसकमतेस्मृतिसाधारणंप्रामाण्यंकेवलयाथार्थ्यरूपंस्मृतौपरतएवग्राह्यमितिभ्रमःस्यात्समाप्तइदित्यर्थः। तेनस्मृतिसाधारणज्ञानपदोपादानमहिम्नाज्ञानसामान्यप्रामाण्यपक्षोलभ्यतइतिस्मृतिसाधारणयाथार्थ्यमात्रस्यपक्षत्वंलभ्यतइत्यर्थः। तथाचयथार्थस्मृतिग्राहकसकलसामग्र्याअपिस्वाश्रयग्राहकसामग्र्यंतर्गतत्वलाभात् नोक्तभ्रमइतिभावः। अत्रच

तन्मते अनुभवत्वस्यस्मृत्यन्यज्ञानत्वरूपस्यस्वतोग्रहासंभवाद्यादृशसामग्र्याअनुभवेगृह्यमाणे १३

द्वितीयदलेअन्यांतनिवेशः तद्दर्थश्चयादृशस्यमतद्वयसिद्धस्वतोग्राह्यतातादृशापर्माप्तधर्मपर्याप्त्याश्रयत्वंतेनोभयमसिद्धस्वतोग्राह्यप्रामाण्येकदेशरजतत्वादिप्रकारकत्वाद्विशिष्टप्रामाण्यस्याप्रामाण्यस्यानंतादृशसामग्र्याः स्मृतिस्थलेप्यविशेषाच्चनोक्तभ्रमसंभवइत्यस्वरसः। समर्थप्रवृत्तिजनकतावच्छेदकपरसंवादिप्रवृत्तिप्रयोजकवृत्तिपरंप्रयोजकत्वंकारणीभूतप्रमातत्कारणसाधारणंसर्वसाधारणेतिप्रमाकरणसाधारणेत्यर्थः। प्रमाकरणत्वस्यापिप्रमाद्वारासंवादिप्रवृत्तिप्रयोजकसाधारण्यादितिभावः। एवंसतिचक्षुरादिनिष्ठप्रमाकरणत्वेज्ञातोवाधवारकतयाज्ञानपदंसार्थकयिष्यन् विशेष्यावृत्त्यप्रकारकत्वादौज्ञानपदेदत्तेप्युक्तपक्षतावच्छेदकाक्रांतेज्ञातोवाधमुद्धरतयाशंकितंप्रथममतउद्धरति। यावदित्यादियाह्यजातीयत्वमितियावज्ज्ञानग्राहकग्राह्यजातीयत्वमित्यर्थः। तज्जातीयत्वंचतद्वृत्तितादृशग्राहकग्राह्यताकत्वमतद्वयसिद्धतादृशग्राहकग्राह्यताकान्यधर्मत्वान्यतररूपवत्वंविशेष्यावृत्त्यप्रकारकत्वादौचयावत्तादृशग्राहकग्राह्यतद्वद्विशेष्यकतत्प्रकारकत्वदृत्तिन्यायमतसिद्धस्वतोग्राह्यताकज्ञानत्वादिभिन्नत्वसहितप्रमाधर्मत्वसत्वात्तज्जातीयत्वरूपसाध्यनिर्वाहान्नोज्ञातोवाधः अन्यतरघटकप्रथमदलनिवेशात् ज्ञानत्वादौनोज्ञातोबाधः नवासौधर्मीप्रसिद्धिस्वतोग्राह्यज्ञानत्वादिदृत्तिप्रमाधर्मत्वमादायासिद्धसाधनवारणायतद्घटकबाधोमीमांसकमतेन्यायमतेसाध्याप्रसिद्धिः प्रमाकरणत्वेबाधघटनायप्रमाधर्मत्वनिवेशः प्रमात्वस्थलेज्ञानत्वमात्रनिवेशेज्ञानदृत्तिधर्ममात्रएवान्यतररूपसत्वेनवाधानवकाशात् पक्षतावच्छेदकघटकज्ञानदृत्तित्वभिन्नांशेवैयर्थ्यमितिप्रमात्वनिवेशनं। तन्निवेशेनिष्प्रकारकत्वादौवाधवारकतयानिरुक्तप्रामाण्यपदार्थनिवेशसार्थक्यं एवंसतिविशेष्यावृत्त्यप्रकारकत्वादिमा

प्रामाण्यांशाइत्यर्थः २

तन्मतेचैत्यविवक्षोतिः ११

त्रस्यस्वतोग्राह्यतामादायार्थांतरनिरासस्तादृशधर्मस्यस्वतोग्राह्यत्वासंभवेनबाधादेतदेववाव
स्तुतस्त्वित्यादिकल्पानुसरणेबीजं ॥ यत्तु तत्सजातीयत्वंयत्किंचित्तादृशधर्मव्यापकत्वंतन्न।विशे
ष्यावृत्तिप्रकारकान्यत्वस्यप्रमाप्रमोभयरूपसमूहालंबने ऽसत्वेनप्रमात्वाव्यापकतयाबाधानु
१४ द्धारात्।नचसंवादिप्रवृत्तिप्रयोजकतावच्छेदकत्वंतद्वद्विशेष्यकतत्प्रकारकप्रवृत्तिनियताव्यवहि
तपूर्ववर्तितावच्छेदकत्वमवच्छेदकताघटक[illegible]संबंधश्च स्वाश्रयत्वस्वाश्रयजन्यत्वान्यतरसंबंधः
स्वाश्रयजन्यत्वसंबंधेनप्रमाकरणत्वत्वा॰वच्छिन्नस्यापिनियमतःसंवादिप्रवृत्त्यव्यवहितपूर्वव
र्तित्वात्तदपिसंवादिप्रवृत्तिप्रयोजकतावच्छेदकमितितत्रबाधवारणायज्ञानपदमस्तुप्रमात्वाव्या
पकदर्शितधर्मश्चनसंवादिप्रवृत्तिनियतपूर्ववर्तितावच्छेदकइतिनतत्रबाधावसरइतिवाच्यं॥संबं
धमध्येन्यतरत्वेनस्वाश्रयजन्यत्वमंतर्भाव्यप्रमाकरणत्वसंग्रहेणज्ञानपदसार्थक्योपपादनेप्रमा
त्वप्रमाकरणत्वान्यतरत्वेनप्रमाकरणत्वपक्षेंऽतर्भावैवतत्पदसार्थकत्वोचित्यात्।तथासतिसा
ध्येसजातीयत्वानंतर्भावेपिबाधानवकाशात्प्रमात्मकज्ञानीयरजतत्वादिप्रकारकव्यक्तीनांस्व
तोग्राह्यतयातद्व्यापकतामादायप्रमात्वेसाध्यत्वेनसिद्धसाधनापाताच्च।नचयेनरूपेणस्वतोग्रा
ह्यतातादृशयत्किंचिद्धर्मावच्छिन्नव्यापकत्वमेवस्वतोग्राह्यजातीयत्वंरजतत्वप्रकारकत्वत्वादि
नैवरजतत्वप्रकारकत्वत्वादेःस्वतोग्राह्यतातद्रूपावच्छिन्नंचभ्रमसाधारणमिति।नतदवच्छिन्नव्याप
कताप्रमात्वस्यगुरुमतेशक्तिज्ञानसहितस्वतंत्ररजतत्वाद्यवच्छिन्नरजतत्वविषयकज्ञानरूपभ्र १४
मेपिज्ञानांतरविषयज्ञानस्यशेरजतत्वस्यविशेषणतयातत्रापिरजतत्वप्रकारकत्वत्वावच्छिन्न

सत्वेननतदवच्छिन्नव्यापकताप्रमात्वस्येतिनतन्मतेप्रमात्वस्यस्वतोग्राह्यत्वासिद्धिरितिवाच्यम् ॥
एवमपिरजतत्वाद्युपलक्षितधर्मिविशेष्यतानिरूपितत्वादिप्रकारकताकत्वत्वरूपस्वतोग्राह्य
तावच्छेदकरूपावच्छिन्नं[illegible]तिरजतत्वादिविशेष्यकत्वावच्छिन्नरजतत्वादिप्रकारकत्वत्वविशिष्टस्य
व्यापकतयासिद्धसाधनस्यदुर्वारत्वात्॥यदिचनिर्धर्मितावच्छेदकज्ञानस्यप्रवर्तकतयाअव
च्छिन्नरजतादिनिष्ठविशेष्यतानिरूपितरजतत्वादिनिष्ठप्रकारताकत्वमपिनिरुक्तपक्षताव
च्छेदकाक्रांतंतस्यचननिर्धर्मितावच्छेदकरजतत्वादिप्रमासाधारणोपदर्शितधर्मव्यापकत्वमि
त्युच्यते।तदापिरजतत्वाद्युपलक्षितनिष्ठावच्छिन्नविशेष्यतानिरूपितरजतत्वादिप्रकारताकत्व
रूपन्यायमतसिद्धस्वतोग्राह्यधर्मव्यापकतामादर्शितप्रमात्वेसत्वेनसिद्धसाधनस्यदुर्वार
त्वात्।एवंप्रमात्वस्यज्ञानव्यक्तिभेदेनभेदात्किमपिप्रामाण्यंसंवादिप्रवृत्तिनियतपूर्ववर्ति
तावच्छेदकंयत्किंचित्संवादिप्रवृत्तिनिवेशनेपिनकस्यापिप्रामाण्यस्यस्वतोग्राह्यतावच्छेदक
रूपावच्छिन्नव्यापकत्वमितिबाधोदुर्वारएवेत्यलमसदावेशेन॥वस्तुतस्त्विति॥प्रमापदप्रवृत्ति
निमित्तंप्रमापदप्रवृत्तिनिमित्तत्वा॰वच्छिन्नं॥अतएवतद्वतितत्प्रकारकत्वत्वस्यपक्षताव
च्छेदकत्वादेवाधुनिकेति।पितृकृतनामरूपेत्यर्थः।प्रवृत्तिनिमित्तइतिशरीरवृत्तिजाति
विशेषइतिशेषः ज्ञानपदमिति॥ज्ञानपदेदत्तेशरीरवृत्तिजातेर्ज्ञानवृत्तित्वाभावाद्युदासः।
नचपरतोग्राह्ययद्धर्मविशिष्टज्ञानेप्रमापदंकेनचित्संकेतितंतादृशधर्मेबाधएवमादिदु
र्वारएवेतिवाच्यम्॥द्वादशेहनिपितानामकुर्यादितिश्रुतिसत्वेनपितृकृतंनामैववाचकंनत्वा

धुनिकपदांतरमितिज्ञानद्वत्तिपरतोग्राह्यधर्मांतरस्यप्रमापदप्रवृत्तिनिमित्तत्वाभावात् ॥ शक्यता
 वच्छेदकस्यैवप्रवृत्तिनिमित्तत्वात् ॥ अथनामकरणविधायकश्रुतिर्नचैत्रादिपदशक्तिग्राहिका
कुतः पितृकृतनाम्नोवाचकत्वमन्यनाम्नोवाचकत्वमितिविशेषइतिचेदुच्यते । द्वादशेहनिपि
 तानामकुर्यादितिपुत्रेपदविशेषसंकेतविषयकंवाक्यंपदविशेषबोद्धव्यत्वविशिष्टपुत्रविष
यकसंकेतस्येष्टसाधनताबोधकंतत्रचतादृशवाक्यार्थविशेषबोद्धव्यत्वविशिष्टपुत्रविषय
कसंकेतस्येष्टसाधनताबोधकंतत्रचतादृशवाक्यार्थविषयकंवेदवकृर्भगवतोज्ञानमिवता
दृशवाक्यार्थबुबोधयिषापिहेतुः अन्यथातात्पर्यानिर्वाहात् ॥ वाक्यार्थबुबोधयिषाच
वाक्यार्थोपरक्ततद्विषयकबोधमवगाहमानावाक्यार्थमप्यवगाहतइतिभगवदिच्छायाः
पदविशेषबोद्धव्यत्वविशिष्टपुत्रविषयकत्वेनसंकेतविषयकत्वासिद्धौपदविशेषबो
द्धव्यत्वविशिष्टपुत्रविषयकत्वमपिसिद्धंतथाचचैत्रादिपदबोद्धव्यत्वप्रकारतानिरूपि
तभगवदिच्छाविशेष्यतायाश्चैत्रादौसत्वेनपितृसंकेतितस्यापिचैत्रादिपदस्यपुरुषवि
शेषवाचकत्वंदुरपवादमेव ॥ नचैवमपिचैत्रत्वादिजातेः प्रवृत्तिनिमित्तत्वंनसिद्ध्यति
यद्विशिष्टेयत्पदबोध्यत्वंपरमेश्वरसंकेतेनावगाह्यतेतादृशविशेषणस्यैवतत्पदप्र
वृत्तिनिमित्तत्वात् उपदर्शितेच्छायांचपुत्रत्वादिविशिष्टस्यैवबोद्धव्यतयाभानंनतु १५
जातिविशेषाणामितिवाच्यं । पुत्रासाधारणधर्मपुरस्कारेणैवपुत्रविषयकसंकेतस्य

विधेयतयायादृशधर्मविशिष्टविषयकत्वस्यसंकेतविशेषणतयातादृशवाक्यार्थघटक
तयातादृशवाक्यार्थविषयिण्यांभगवदिच्छायांपुत्रासाधारणधर्मत्वोपलक्षितजातिविशेषा
णांबोद्धव्यत्वविशेष्यतयाप्रसमानेधर्मिणिविशेषणतयाअवगाहनध्रौव्यात् । एवमा
नुपूर्वीविशेषाणांवाचकतावच्छेदकत्वमपिनिर्वहतिउपलक्षणीभूतेनकेनचिद्धर्मेणानुपूर्वी
विशेषाणामपिबोधविशेषणतावच्छेदकतयाभगवदिच्छयावगाहनस्योपगंतव्यत्वात् ॥ या
दृच्छिकसंकेतस्यचपदविशेषबोद्धव्यत्वविशिष्टवस्तुविशेषविषयकत्वेनवेदार्थत्वेमानाभा
वेनतद्विषयवस्तुनस्तत्पदबोद्धव्यतयाभगवदिच्छाविषयत्वमप्रामाणिकमितितादृशसंके
तविषयेपदमवाचकमेवयद्यपिचैत्रत्वावच्छिन्नस्यचैत्रादिपदबोद्धव्यत्वमन्यथाजातिविशेष
वांश्चैत्रादिपदजन्यबोधविषयोभवतित्याद्याकारकपितृसंकेतेप्राधान्येनभासतेनत
थाप्राधान्येनसंकेतबोधविषयकभगवदिच्छायांभासतेकिंतुसुखीस्यामित्यादौसुखत्वादि
कमिवोद्देश्यव्यवहारानियामकतावच्छेदकतारूपतद्विषयताभाजनमेवेतितथापितत्त
त्पदबोद्धव्यतायास्तत्तदर्थविशेषभगवदिच्छाप्रकारतामात्रंतत्तदर्थस्यतत्तत्पदवाच्यतानि
यामकंनतूद्देश्यव्यवहारप्रयोजकविषयतैवेत्यदोषः अधिकमन्यत्रविवेचितं ॥ उभय
वादिसिद्धस्येति । पक्षस्यैकस्योभयमतासिद्धत्वेवादिभ्यांस्वस्वमतसिद्धविभिन्नध
र्मिणोरेवभावाभावरूपस्वस्वाभिमतसाध्यवत्त्योपन्यासेसंशयस्यैवानुपपत्तिरेक

 धर्मिणिभावाभावोभयज्ञानस्यैवसंशयत्वादितिभावः इहप्रकृतविप्रतिपत्तौविषयइतिशेषः धर्मी
स्वतस्त्वपरतस्त्वरूपधर्मवत्तयोपन्यस्तः। धर्मिपदंचविषयपदार्थविशेषणतयास्वार्थबोधक
मितिपुल्लिंगता॥ प्रकारत्वगर्भत्वादिति। तद्वतितत्प्रकारत्वरूपत्वादितिभावः। प्रामाण्यस्य॥ प्रा
१६ माण्यपदार्थस्य। तस्यचेति॥ प्रकारत्वस्यचेत्यर्थः। न्यायमतइतिशेषः। परःगुरुःविषयइति।
नियमतइत्यादिः। तथाचतन्मतेसमवायादेःसांसर्गिकविषयतायाअप्रामाणिकतयासंसर्ग
तयातदंशेतदीयतत्संबंधविषयताशालित्वरूपंतदंशेतत्संबंधेनतत्प्रकारकत्वंप्रामाकराणाम
सिद्धमितिसमवायादिनारजतत्वादिमतिसमवायादिनारजतत्वादिप्रकारकत्वरूपंन्यायमत
सिद्धंप्रामाण्यंनपरमतसिद्धमुभयमतप्रसिद्धंचागृहीतासंसर्गकधर्मधर्मिविषयकैकज्ञानत्वं
नगुरुमतेपिस्वतोग्राह्यमितिकस्यपक्षतेतिभावः। यद्यपिवस्तुतस्त्वित्यादिनाप्रमापदप्रवृत्ति
निमित्तत्वावच्छिन्नस्यपक्षतायांनिर्भरःकृतःउभयमतेप्रमापदनिमित्तत्वावच्छिन्नंप्रसिद्धमे
वतथापितन्मतेप्रमापदप्रवृत्तिनिमित्तंरूपमसंसर्गाग्रहघटितमेवतत्रचतन्मतेपिस्वतस्त्व
बाधात्न्यायमतसिद्धप्रमापदप्रवृत्तिनिमित्तोपदर्शितधर्मस्यचतन्मतासिद्धत्वात्। प्रमाप
दप्रवृत्तिनिमित्तत्वस्यतत्प्रवृत्तिनिमित्ततयान्यायमतसिद्धत्वस्यवानपक्षतावच्छेदकत्वसं
भवः एवंतत्प्रकारकत्वस्योभयासिद्धत्वेविशेष्येतद्धर्मवत्त्वेतद्धर्मप्रकारकत्वंचव्यवसायस्या
नुव्यवसायेनानुमित्यास्वप्रकाशेनवागृह्यतइतिअग्रिममूलासंगतिश्चेत्याक्षेपसंगतिः॥
निगर्वस्त्वित्यादेःपूर्वंनन्वित्यादिपाठेतुतद्वतितत्प्रकारकत्वावच्छिन्नस्यैवेतत्पूर्वपक्ष १६

तावच्छेदकत्वेनाभिप्रेतत्वादाक्षेपसंसाधुसंगच्छतेअतएववस्तुतस्त्वित्यादिकल्पेप्रमापदप्रवृत्तिनि
मित्तमुभयसिद्धंपक्षइत्युक्तं। उक्ताक्षेपपरीहारप्रकाराकतयैवपक्षतावच्छेदकस्योभयसिद्धतोक्ती
र्तनसंगतेः॥ नचप्रमापदप्रवृत्तिनिमित्तत्वेनपक्षत्वेप्युक्तानुपपत्तेर्दुर्वारतयाकथंतदवलंब्याक्षेप
परीहारसंगतिरितिवाच्यम्॥ साकांक्षधर्मधर्मिविषयकैकज्ञानत्वरूपविशिष्टज्ञानत्वमेवतन्मते
प्रमापदप्रवृत्तिनिमित्तंतत्रचपदार्थांतररूपाकांक्षैवप्रविष्टानत्वसंसर्गाग्रहइतितस्यस्वतोग्राह्य
तासंभवइत्यभिप्रायकतयातत्संगतेः। नचतादृशप्रमापदप्रवृत्तिनिमित्तस्यस्वतस्त्वसंभवे
पितन्मतेतस्यपक्षत्वेतत्प्रकारकत्वस्यस्वप्रकाशताग्राह्यताव्युत्पादकमूलासंगतिर्दुर्वारैवेतिवा
च्यं। स्वप्रकाशेगृह्यतइत्यस्यान्वयिनःतद्धर्मप्रकारकत्वमित्यस्यस्वविषयधर्मिसाकांक्षतद्ध
र्मावगाहिज्ञानत्वरूपविशिष्टज्ञानत्वार्थकत्वोपगमात्तदुत्तरंतद्विशिष्टज्ञानत्वंवेतिपूरणाद्वात
त्संगतेः। वैशिष्ट्यस्यसमवायादेर्विशिष्टज्ञानाविषयत्वेविशिष्टज्ञानत्वंदुर्वचमित्याशंकांपरिह
रति। अगृहीतेति। स्वविषयतद्धर्मिनिष्ठतत्संसर्गावच्छिन्नाभावप्रतियोगितयागृह्यमाण
तद्धर्मावगाहिज्ञानत्वस्यतद्धर्मिणितत्संबंधेनतद्विशिष्टज्ञानत्वरूपत्वादित्यर्थः। अगृह्यमा
णत्वंचतत्कालावच्छिन्नोगृह्यमाणत्वाभावःनतुतदागृह्यमाणत्वस्याभावःधर्मिवृत्तितयाअ
भावांतरग्रहासमानकालीनविशिष्टबुद्धावव्याप्तेःवास्तवतत्परंयथाश्रुतार्थेधर्मिधर्मिपरं
व्यवच्छेद्येति॥ असंसर्गाग्रहकालीनदंडपुरुषरूपधर्मधर्मिविषयकसमूहालंबनस्यागृही
तासंसर्गकेत्यनेनयथाश्रुतार्थधर्मधर्मिविषयकत्वेनवाव्यावर्तनादित्यर्थः। नचासंसर्गाग्र

हकालेभवन्मतसिद्धविशिष्टज्ञानस्यापिसामग्रीसत्वात्समूहालंबनमेवनोत्पद्यतइतिवाच्यं।प्र
त्यक्षस्थलेकथंचिद्विशिष्टज्ञानोत्पादनियमसंभवेपिविभिन्नसंस्कारादिभिःसमूहालंबनस्म
रणादिदशायांविभिन्नस्मरणाद्यसंभवात्।अस्मन्मतेतिन्यायमतसिद्धोयोसंबंधप्रतियो
 गित्वानुयोगित्वाख्यरूपसंबंधोतदात्मकधर्मत्वधर्मित्वपरमित्यर्थः॥तयोर्न्यायमतसि
द्धत्वकथनंनचतदवगाहित्वघटितप्रामाण्यस्योभयसिद्धतासूचनायएवंचस्वीयतद्धर्मि
विषयतानिरूपितायात्तत्संसर्गावच्छिन्नधर्मित्वविषयतातन्निरूपितायातद्धर्मविषयता
निरूपिततादृशधर्मत्वविषयतातच्छालिज्ञानत्वंतत्रचतत्संबंधेनतद्विशिष्टज्ञानत्वंधर्मि
त्वेवास्तवतद्धर्मिनिष्ठत्वमुपेक्ष्यतद्विषयतायांतद्विषयतानिरूपितत्वनिवेशान्नेदंद्रव्यंत
द्रजतमितिसमूहालंबनबुद्धेरिदंत्वतत्वावच्छिन्नांशेरजतत्वद्रव्यत्वविशिष्टबुद्धित्वापत्तिः।
नचधर्मिव्यक्तिभेदेनधर्मिताभेदान्नेयमापत्तिरितिवाच्यं।तथाप्येकव्यक्तावेवविभिन्नरूपे
णयत्रविभिन्नविशेषणविशेष्यतातादृशसमूहालंबनविशिष्टबुद्ध्योर्वैपरीत्यप्रसंगस्य
दुर्वारत्वात्।अस्मन्मतेचतद्धर्मावच्छिन्नांशेविशिष्टधियोलक्षणेतद्धर्मावच्छिन्नायाधर्मि
विषयतायानिवेशनीयतयाअतिप्रसंगानवकाशात्।तद्धर्मत्वेवास्तवतद्धर्मनिष्ठत्वमु
पेक्ष्यतदुभयविषयतयोर्निरूप्यनिरूपकभावनिवेशाद्विभिन्नरूपावच्छिन्नस्यएकस्यय
त्रविभिन्नविशेषणविशेष्यतातत्रनवैपरीत्यप्रसंगःतद्धर्मावच्छिन्नविशिष्टबुद्धित

क्षणेतद्धर्मावच्छिन्नायाधर्मविषयतायाएवनिवेशात् तद्धर्मिविषयतानिरूपिततद्धर्मित्वविषय
तानिरूपिततद्धर्मविषयतायाएवतद्धर्मिविषयतानिरूपितधर्मत्वविषयतानिरूपितधर्मविषय
तायाएववानिवेशेरजतमित्यादिबुद्धेरजतत्वादौरजतत्वादिविशिष्टबुद्धित्वापत्तिरितिधर्मित्वधर्म
त्वयोर्द्वयोरेववविशिष्टबुद्धौमानमंगीकृत्यतदुभयावगाहिताघटितलक्षणादरः।धर्मित्वधर्मत्वयोश्च
संसर्गविधयाविलक्षणविषयतामुपगम्यसैवनिवेशनीया अन्यथाधर्मितादि[illegible]कारकस्यपुरुष
निष्ठधर्मिताप्रतियोगिकधर्मतावान्दंडइत्यादिज्ञानस्यदंडादिविशिष्टबुद्धित्वापत्तेः एतावद्दूरपर्य
न्तलाभायासंसर्गाग्रहोपादानंअस्मन्मतसिद्धविशिष्टज्ञानकार्यकारितन्मतसिद्धधर्मिधर्मवि
षयकज्ञानद्वयीयधर्मधर्मिविषयतयोरपिधर्मत्वधर्मित्वविषयतानिरूपितत्वोपगमात्तद्वार
णायधर्मिविषयतायांस्वीयत्वलाभार्थमेकपदंइदमेवचप्रमापदप्रवृत्तिनिमित्तत्वेनतन्मतेप
क्षः अत्रैवविषयतायांस्वीयत्वंपरित्यज्यधर्मिणितद्वत्त्वंनिवेश्यताद्रूप्येणैवपक्षत्वमितिवा।
अभिप्रेतत्वंननुधर्मत्वाद्यनवगाहित्वंनतन्मतसिद्धमित्याशंकांपरिहरति।तन्मतइतिविषय
त्वात्॥विषयतायानिर्विवादत्वात्विशेषणत्वविशेष्यत्वयोरेवधर्मत्वादिरूपत्वादितिशे
षः।तद्वतितत्प्रकारकत्वमित्यस्याप्ययमेवार्थइत्याह।तथाचेति।ननुयदिघटत्वादिप्रका
रकज्ञाननिष्ठप्रमापदप्रवृत्तिनिमित्तंघटत्वादिभेदेनभिद्यतेतदाकुत्रापिप्रमापदप्रवृत्तिनि
मित्तेनप्रमापदप्रवृत्तिनिमित्ताश्रयग्राहकसामग्रीग्राह्यत्वंघटपटादिज्ञानग्राहकसकलसा

अंतर्गत

प्र-मि-टी-ग मग्रीणामेवप्रमापदप्रवृत्तिनिमित्ताश्रयग्राहकयावत्सामग्रीग्राह्यत्वात् घटादिज्ञाननिष्ठप्रमाप
दप्रवृत्तिनिमित्तस्यचपटादिज्ञानग्राहकाग्राह्यत्वात् घटत्वादिप्रकारकज्ञानंविशेष्यनिवेश्यतद्ग्रा
हकयावद्ग्राह्यत्वसाधनेप्यंशतोबाधोदुर्वारएव अतःसकलज्ञाननिष्ठप्रमापदप्रवृत्तिनिमित्तमेक
१८ मेवांगीकार्यं तथाचगुरुमतेअप्रामाण्याग्राहकत्वविशेषणवैयर्थ्यं अयंघटइत्यादिज्ञानेघटत्वा
द्यंशेअप्रामाण्यभ्रमस्यापिस्वनिष्ठकिंचिदंशीयप्रामाण्यावगाहित्वात् नचोक्ताप्रामाण्य
भ्रमस्तन्मतेस्वविषयकज्ञानात्मकोघटइतिव्यवसायस्तदगृहीतासंसर्गकाप्रामाण्योपस्थि
तिश्चतत्राप्रामाण्योपस्थितिर्घटत्वाभावादिरूपाप्रामाण्यघटकप्रकारांशीयप्रामाण्यंगृह्णा
तुघटइतिव्यवसायश्चघटत्वरूपप्रकारांशेप्रामाण्यानवगाहनेकस्मिन्नंशेप्रामाण्यंगृह्णी
यादितिवाच्यं। घटइतिव्यवसायस्यघटत्वप्रकारकतावत् अप्रामाण्यभ्रमधर्मितावच्छेदकी भ
भूततज्ज्ञानवृत्तीदंत्वादिप्रकारकत्वांशेप्रामाण्यावगाहितासंभवादित्याशंकांनिरस्य
ति। ज्ञानप्रामाण्यपदेइति तत्तद्व्यक्तिपरेइतिघटत्वादिप्रकारकज्ञानघटत्वादिमद्विशेष्य
कत्वविशिष्टघटत्वादिप्रकारकत्वरूपविषयभेदभिन्नप्रामाण्यपरेनतुप्रामाण्यपदंसर्व
साधारणैकप्रामाण्यपरमित्यर्थः। प्रत्येकंसाध्याभिसंबंधोलभ्यतइति घटत्ववतिघटत्वप्र
कारकत्वादिरूपप्रत्येकप्रामाण्येतत्तत्प्रामाण्याश्रयग्राहकयावद्ग्राह्यत्वरूपसाध्यसंबंधोऽ १८
नुमित्याविषयीक्रियतइत्यर्थः। अयमाशयः। प्रमापदप्रवृत्तिनिमित्तंतद्वतितत्प्रकार

कत्वंसर्वसाधारणमेकमितिनसंभवदुक्तिकंतदर्थस्यभेदात् अपितुघटत्वपटत्वादिभेदाद्भिन्न
मेवएवंचतस्मिन्सामान्यतःप्रमापदप्रवृत्तिनिमित्तत्वेनपक्षीकृतेपिघटत्वादिरूपप्रकारघटित
प्रामाण्येतत्तत्प्रामाण्याश्रयग्राहकयावद्ग्राह्यत्वमबाधितमेवानुमितिविषयःस्वाश्रयत्वेनैवज्ञा
नस्यसाध्यघटकतयाएकप्रामाण्येऽपरप्रामाण्याश्रयग्राहकाग्राह्यत्वेपिक्षतिविरहात् प्रमा
पदप्रवृत्तिनिमित्ताश्रयत्वेनज्ञाननिवेशएवउक्तरीत्यातद्ग्राहकयावद्ग्राह्यत्वस्यकचिदपिप्रामा
ण्येनिर्वाहायोगात् स्वपदार्थस्यतत्तत्प्रामाण्यरूपत्वेपितत्तत्प्रामाण्याश्रयग्राहकयावद्ग्रा
ह्यत्वानामन्यतमत्वेनसाध्यत्वोपगमादंशतोबाधस्याप्यनवकाशात्। तथाचाप्रामाण्याग्रा
त्व हकविशेषणाप्रवेशेतत्तत्प्रामाण्येतत्तत्प्रामाण्यविरोध्यप्रामाण्यभ्रमरूपतदाश्रयग्राहक ह
काग्राह्यतयाबाधोदुष्परिहरएवेतिनतद्वैयर्थ्यमिति केचित्तुबाधेनप्रमापदप्रवृत्तिनिमित्ताश्र
यग्राहकयावत्सामग्रीग्राह्यत्वस्यप्रामाण्येसाधनासंभवात्॥ ज्ञानग्राहकसामग्रीत्वावच्छे
देनैवप्रमापदप्रवृत्तिनिमित्तग्राहकत्वंमीमांसकैःसाधनीयं तथाचगुरुमतेअप्रामाण्याग्रा
हकपदवैयर्थ्यमितिशंकायामुक्तफक्किकामवतारयेति चतुर्थविप्रतिपत्त्यनंतरंप्रत्येकमे
वेत्युक्तेस्तत्पूर्वविप्रतिपत्तित्रयेयावज्ज्ञानग्राहकसामग्रीग्राह्यत्वादिरूपकोटिद्वयोरत्रयाणां
वासिद्धाधर्मिविशेषितेत्याकांक्षोदयात्तांनिवर्तयितुमाहइयमिति। इमंप्रथमावधिविप्रतिपत्ति
त्रयविषयीभूताभावकोटिर्मीमांसककोटित्रयसाधारणीतत्रयासिद्धाप्ययिषिताततत्रप्रथ

 मविप्रतिपत्तेर्विधिकोटिर्मतत्रयेप्रामाण्यरूपेपक्षेसत्वंदर्शयति गुर्वित्यादिना। स्वप्रकाशः स्वविषय
कोरजतमिदमित्यादिव्यवसायः आदिपदेर्मतत्रयएवप्रमापदजन्यशाब्दबोधादिपरिग्रहः ज्ञाततालिं
गकानुमित्यादिनाप्रामाण्यस्यग्रहादितिशेषः सर्वमतसाधारणत्वात्। मतत्रयएवतत्रोपपत्तेः प्रा
 भाकरादिमतेस्वप्रकाशाव्यवसायादिसामग्र्याएवज्ञानग्राहकत्वादितिभावः। तत्प्रसिद्धिः तत्तत्प्रा
माण्याश्रयज्ञानग्राहकयावद्ग्राह्यत्वस्यमीमांसकनैय्यायिकोभयमतेप्रसिद्धिः तत्तज्ज्ञानइतिग्रह
तप्रामाण्याश्रयज्ञानइत्यर्थः। यद्यपिरजतत्ववतिरजतत्वप्रकारकत्वाश्रयाणांरजतमित्याकारक
नानाज्ञानानांप्रत्येकंनकस्यापितदाश्रययावद्ग्राहकग्राह्यत्वंतथापिस्वत्वाननुगमेनप्रमापदप्रवृत्ति
निमित्तसामान्येनस्वाश्रयग्राहकयावद्ग्राह्यत्वसाधनंघटते अतस्तत्तज्ज्ञानवृत्तिप्रमापदप्रवृत्तिनि
मित्तेविशिष्यतत्तज्ज्ञानग्राहकयावद्ग्राह्यत्वंसाधनीयं। अप्रामाण्यग्राहकानुव्यवसायादिग्राह्यज्ञा
दै नप्रामाण्यंविशिष्यनोपादेयं॥अपितुतदन्यदेवेतिला[illegible]वसाध्येअप्रामाण्याग्राहकत्वोत्कीर्तन
मित्यभिप्रायेणेदंरजतत्वादिप्रकारकप्रमाग्राहकयावद्ग्राह्यत्वानामन्यतमत्वेनाननुगमस्यत्वप्रमाप
दप्रवृत्तिनिमित्तरजतत्वादावित्यर्थः। नचकस्यापिरजतस्यप्रत्येकंनरजतविशेष्यकरजतत्वप्रका
रकज्ञानग्राहकयावद्ग्राह्यत्वंतत्तद्रजतस्यतत्तद्रजताविषयकरजतज्ञानग्राहकाग्राह्यत्वादितिवा
च्यं॥ज्ञानव्यक्तिभेदेनविषयताभेदविरहेपिविशेष्यादिभेदेनविशेष्यतायाः प्रकारतायाश्चभेदा
त्तद्घटितस्यविशेष्यताविशेषणतामत्रविशेष्यरजतादिनापिघटितस्यप्रामाण्यस्यनानारज

तादिविशेष्यकज्ञानेष्वैक्यानिर्वाहेणएकैकरजतादिघटितप्रामाण्याश्रयग्राहकयावद्ग्राह्यत्वाना
मेवसाध्येंतर्भावनीयतयाविशेष्यरजतादावपिप्रसिद्धिसौलभ्यात् आदिनाकेवलप्रकारित्वादिप
रिग्रहः। ननुज्ञानत्वेतत्प्रसिद्धिः कथमुपेक्षितात्यत आह। ज्ञानत्वइतिपरमतेपरमतएवनतुन्या
यमतइतिशेषः। तन्मतेप्रमापदघटितशाब्दसामग्र्याअपिविलक्षणीयसविषयज्ञानग्राहकयाव
त्सामग्र्यंतर्गततत्वीतयाचजातिरूपानुभवत्वस्यैवग्रहेणज्ञानत्वेप्रसिद्ध्यसंभवात्। नन्वेवंपरमते
पिकुतोज्ञानत्वेतत्प्रसिद्धिरुक्तसामग्र्यैवाग्रहादित्यतआह। तन्मतइति। ज्ञानस्यैवज्ञानत्वस्यैवानु
भवत्वेनअनुभवत्वरूपत्वेनअनुभवपदेनानुभवत्वघटितप्रमात्वविशिष्टवाचकप्रमापदेनअनुभव
पदस्यविषयसहितज्ञानग्राहकत्वाभावेनयथाश्रुतासंगतेः इदंतुसर्वेयथार्थोयामपिस्मृतौप्रमाव्य
वहाराभावेनप्रमापदस्यानुभवत्वघटितधर्मएवप्रवृत्तिनिमित्तमित्याशयेन। नचतथासतिप्रमा
पदप्रवृत्तिनिमित्तत्वेनपक्षत्वमेवासंभवदुक्तिकंभवेत्। अनुभवत्वघटितेतस्मिन्स्वतस्त्वबाधादि
तिवाच्यं॥अनुभवत्वावच्छिन्नविशेषणतयाप्रमापदशक्यतावच्छेदकस्यैवप्रमापदप्रवृत्तिनिमि
त्तपदेनविवक्षणात्॥ नचानुभवत्वस्यज्ञानत्वघटितत्वेपिरजतत्ववतिरजतत्वप्रकारकोगुणइ
तिशाब्दादिसामग्रीवदुपदर्शनीयविशेषणेनवारणात्। अनेकाशेषार्थकयावत्पदस्यानेकताक
पमर्थंप्रकृतेपरित्यजति। यावत्पदमिति। अशेषतामेवस्पष्टयति। तेनेति स्वविषयकत्वनिय
ततिस्वग्राहकत्वनियतेत्यर्थः। नियतत्वंव्याप्यत्वंसामग्र्यास्तादात्म्यसंबंधेनबोध्यंस्वाश्रयग्रा
ञ शाब्दबोधादिना ज्ञानग्रहाग्रहात्परमतेपिनज्ञानत्वेतत्प्रसिद्धिरितिवाच्यं ताद्दशसामग्रीणांरजतत्वप्रकारकोगुणइति ञ

प्र॰मि॰टी॰ग॰ हकसामग्रीत्वव्यापकस्वग्राहकताकत्वंपर्यवसितंसामग्रीपदंचउभयत्रग्रहोपधायकतारूपग्राहक
तात्मायव्यापकदिशिस्वरूपयोग्यतानिवेशेन्यायमतेप्यनुव्यवसायसामग्रीणांसर्वासामेवोपनी
२० तप्रामाण्यविशिष्टज्ञानलौकिकमानसस्वरूपयोग्यतयासिद्धसाधनात् व्याप्यदिशिस्वरूपयो
ग्यतानिवेशेज्ञानग्रहफलानुपधायकमनोयोगादिव्यक्तिसाधारणज्ञानग्रहस्वरूपयोग्यतां
प्रतिप्रामाण्यग्रहाद्युपधायकतायाआवश्यकतयासाध्याप्रसिद्ध्यापत्तेः। यद्यपिन्यायमतेपि
प्रामाण्यग्राहकतानिर्वाच्यसविषयकज्ञानग्राहकसामग्रीत्वव्यापिकैवरजतत्वप्रकारकत्वत्वा
दिनैवअनुव्यवसायसामग्रीभिः प्रामाण्यग्रहात् नचस्वाश्रयग्राहकत्वव्यापकतोपधायकता
कग्रहविषयत्वंप्रामाण्यत्वावछिन्नेसाधनीयंन्यायमतेप्रामाण्यत्वस्यरजतत्वादिविशिष्टविषय
विशेष्यकत्वावछिन्नत्वघटितस्यानुव्यवसायात्मकग्रहविषयतानवछेदकतयातदवछेदेनोक्त
साध्यसाधनासंभवात् नचप्रमापदप्रवृत्तिनिमित्ततावछेदकतापर्याप्त्युपलक्षितधर्मावछिन्नेसा स्मु
ध्यंसाधनीयं तादृशाश्चधर्मोरजतादिविशेष्यकत्वावछिन्नत्वसहितरजतत्वादिप्रकारितात्वमे
वतादृशस्यचोक्तग्रहविषयतावछेदकत्वंपरमतएवनदोषइतिवाच्यं ॥ एवमपिन्यायमतेपि
क्वाचित्कप्रामाण्यत्वविशिष्टग्राहकतायाः प्रमेयत्वग्राहकत्वत्वादिनातथाविधसामग्रीत्वव्याप
कतयासिद्धसाधनस्यदुर्वारत्वात् तत्समानाधिकरणाभावाप्रतियोगित्वरूपव्यापकतानि
वेशेसामग्रीभेदभिन्नग्राहकतानांसर्वासामेवचालनीन्यायेनसामग्रीनिष्ठाभावप्रतियोगित २०
नवछेदकत्वादितिवाच्यं प्रमापदप्रवृत्तिनिमित्तस्यपक्षतावछेदकमतेमीमांसकमतेपितस्ययावज्ज्ञानग्रहविषयता

यासाध्याप्रसिद्धेः प्रामाण्यत्वविशिष्टग्राहकतात्वेनव्यापकतानिवेशेतादृशव्यापकतायानैया
यिकासिद्धतयातन्मतेसाध्याप्रसिद्धिः नचप्रामाण्यत्वविशिष्टग्राहकतात्वतादृशग्राहकता
भिन्नग्राहकतात्वान्यतररूपेणयाव्यापकतातद्वद्ग्राहकताकत्वस्यसाध्यतयानन्यायमते
साध्याप्रसिद्धिः ज्ञानादिग्राहकतायाएवप्रामाण्यत्वविशिष्टग्राहकताभिन्नग्राहकतात्वेनतन्म
तेतादृशसामग्रीत्वव्यापकत्वादितिवाच्यं ॥ ज्ञानादिविषयकस्यापिग्रहस्यप्रामाण्यग्रहतया
ज्ञानादिग्रहतयाचज्ञानादिग्राहकतायाः प्रामाण्यग्राहकतात्मकतयातस्मात्तदन्यग्राहकतात्वे
नव्यापकत्वायोगात् तथापिस्वनिरूपकग्रहोपाधायकत्वसंबंधावछिन्नायाप्रामाण्यत्वाव
छिन्नविषयतात्वज्ञानविषयतात्वान्यतररूपावछिन्नव्यापकतातद्वद्विषयतावत्वस्यसाध्य
तयाविवक्षणान्नदोषः। न्यायमतेज्ञानएवतादृशसाध्यप्रसिद्धेः विषयभेदेनविषयताभेदा
त्। प्रामाण्येज्ञानविषयतात्वेनव्यापिकायाविषयतायाबाधात् प्रामाण्यत्वावछिन्नविषयता
त्वरूपावछिन्नत्वेनरूपेणासिद्धव्यापकताश्रयविषयतासिद्धिः अथवाप्रामाण्यत्वविशिष्ट
ग्राहकतात्वप्रामाण्याविषयकज्ञानविषयतात्वान्यतररूपेणयाव्यापकतातद्वन्निरूपकग्र
हविषयत्वंसाध्यंप्रामाण्याविषयकेनकेनचित् ज्ञानेनतादृशसामग्रीणांकदाचिद्विषयीक
रणात्तादृशज्ञानविषयतात्वेनयातादृशसामग्रीत्वव्यापकतातद्वद्विषयतानिरूपकग्रहविष
यतामादायप्रामाण्याविषयकज्ञानविषयसामग्र्यादावेवप्रसिध्यतिसाध्यंन्यायमतेपि

 प्रामाण्याविषयकज्ञानविषयताप्रामाण्येवाधितेति प्रामाण्यग्राहकतात्वावच्छिन्नत्वेनसामग्री
व्यापकताविषयिणीतादृशव्यापकताश्रयजनकतानिरूपकग्रहविषयतायाः प्रामाण्येसिद्धि
२१ र्निष्प्रत्यूहैवेति। अनेकत्वांशपरित्यागफलमाह अत इति॥ यस्यप्रामाण्यस्यएकैवज्ञानग्रा
हकसामग्रीसविषयकस्वाश्रयग्रहसामग्रीतत्रप्रामाण्येनेकस्वाश्रयग्राहकसामग्र्यप्रसिध्या
साध्यसत्वानिर्वाहेणांशतोबाधोनेत्यर्थः। साध्यघटकसामग्र्यांयावत्पदलभ्यमनेकत्वमप
रित्यजतांपक्षसंकोच्योपदर्शितमंशतोबाधंवारयतांकेषांचिन्मतमाह अत्रकेचिदितिनकिं
चित्ज्ञानपरं॥ ज्ञानत्वेनप्रमापदप्रवृत्तिनिमित्ताश्रयत्वेनवाज्ञानपरंप्रत्येकप्रामाण्यस्यघटत्व
वतीत्यादेःसामान्यरूपेणा[illegible]त्यैक्षीकृतस्यापिप्रत्येकंतदनाश्रयीभूतज्ञानेति[illegible]त्येकंतस्यअना
श्रयीभूतपटादिज्ञानेत्यर्थः। प्रत्येकतदाश्रयेतिपाठेपटत्ववतीत्यादिप्रामाण्यांतराश्रयेत्यर्थः।
मुरारिभट्टयोरितिगुरुमतेज्ञानमात्रस्यैवविषयसाहित्येनस्वजनकसामग्रीग्राह्यत्वनियमा
त्॥ तन्मतानुपन्यासः ज्ञेयत्वानियमेनसविषयकज्ञानग्राहकसामग्रीग्राह्यत्वानियमेनउत्प
न्नस्यापिज्ञानस्यविषयांतरसंचारादिनाअनुव्यवसायाद्यनुदयादि[illegible]वः। अज्ञायमानव्य तिभा
क्तिविशेषप्रामाण्यइतिज्ञायमानाव्यक्तिराश्रयोयस्यतज्ज्ञायमानव्यक्ति। अतथाभूतंयद्विशे
षस्यज्ञानविशेषस्यविषयविशेषघा[illegible]प्रामाण्यंतत्रेत्यर्थः। यथाश्रुतेज्ञायमानज्ञानप्रामा
ण्यस्याप्यज्ञायमानव्यक्तिविशेषवृत्तितयातदाश्रयज्ञानग्राहकसामग्र्याःअप्रसिद्ध्यासंगतेःज्ञा २१

यमानत्वंचज्ञानस्यवक्ष्यमाणस्यविषयज्ञानग्राहकसामग्र्यधीनाभट्टाभिप्रायविषयः। पक्ष
संकोचस्यप्रामाण्यपदस्यविशेषपरतया प्रामाण्यविशेषाणांपक्षबहिर्भावस्यततएवपक्ष
संकोचादेवप्रकृतेपि। एकमात्रसामग्रीग्राह्यप्रामाण्येपिसामंजस्यात्बाधनिरासनिर्वाहा
त्वर्णितमाशयमबुध्यमानस्याशंकामाशयप्रकाशनेननिराकुरुते। नचेत्यादिना। तज्ज्ञानव्य
क्तौतस्यप्रामाण्यस्यज्ञानरूपाश्रयेसामग्रीतादृशप्रामाण्याश्रयज्ञानग्राहकसामग्रीतदप्रसरे
प्रमाणानवतारेधर्मिणएवतदीयप्रामाण्यरूपधर्मिणोपिबुद्ध्यनारोहात अप्रमितत्वात् उभ
यथाप्रमाणप्रसराप्रसराभ्यांसामान्यतःप्रमापदप्रवृत्तिनिमित्ताश्रयतज्ज्ञानत्वादिना। प्रमा
णप्रवृत्तौतज्ज्ञानग्राहकशब्दादिप्रवृत्तौबुद्ध्यारोहसंभवात् तत्प्रामाण्याश्रयत्वेनज्ञानज्ञानात्सा
ध्यघटकसामग्र्यांतादृशज्ञानग्राहकत्वनिश्चयेनसाध्यप्रसिद्धिसंभवादित्यर्थः। ननुतादृशज्ञा
नप्रसिध्यात्तद्ग्रहस्यकार्यतयासामग्र्यधीनत्वानुमानात्तद्ग्राहकसामग्रीमसिद्धिरित्यत
आह। नचतावतेतिसामग्रीप्रसिद्धिःसाध्यघटकसामग्रीप्रसिद्धिःतत्कल्पनानौचित्यात्प्रा
माण्यपदस्यविशेषपरत्वकल्पनायांअयुक्तत्वात्। ननुसंकोचआवश्यकःउक्तयुक्तेरित्यत
आह। नहीति। एकत्रसंकोचःज्ञायमानज्ञानावृत्तिप्रामाण्यस्यपक्षबहिर्भाववत्त्यक्तेअन्य
त्रापिसएकसामग्रीग्राह्याश्रयकप्रामाण्यस्यापितद्बहिर्भावःसुकरइतिशेषः। तदनुरोधात्
मुरारिभट्टयोर्नयेअज्ञायमानाश्रयकप्रामाण्येबाधवारणानुरोधात्। अज्ञानमानज्ञानेत
श्री॰

प्र·मि·टी·ग· रपरतेति यथोक्तसामग्र्याअग्राह्यभिन्नज्ञानपरतेत्यर्थः। एकग्राहकसामग्रीकेतरेपिएकसामग्री
ग्राह्यप्रामाण्यकेतरेत्यर्थः। उभयपरंस्यादिति तथाचमतत्रयसाधारणार्थकत्वात्तैनुपपत्त्याविः
प्रतिपत्तेः साधारण्यंनस्यादितिभावः। नन्वेनेकसामग्रीग्राह्यप्रामाण्यकज्ञानपरतयासाधा
२२ रण्यमित्यतआह। एकत्रेति। तादृशसामग्र्यग्राह्येति अप्रामाण्यग्राहकसामग्रीग्राह्यस्वा
श्रयकेतरेत्यर्थः। एतच्चप्रामाण्येविशेषणंयथाश्रुतस्यज्ञानविशेषणत्वेयादृशाप्रामाण्याश्र
यः किंचिज्ज्ञानमप्रामाण्यग्राहकसामग्रीग्राह्यंकिंचिच्चज्ञानंनतथातद्वारणेनबाधस्यदु
र्वारत्वात् सविषयकज्ञानग्राहिकेति विषयसहितज्ञानग्राहिकाविषयविशेषितज्ञानग्राहि
केतियावत्। ज्ञानपदेनज्ञानपदघटितयाप्रामाण्यबोधकपदाघटितयाज्ञानंगुणइत्यादि
ज्ञानग्रहजनकसामग्र्याघटज्ञानपदेतिघटपदसमभिव्याहृतज्ञानपदघटितप्रामाण्यबो
धकपदाघटितसामग्रीत्यर्थः। योग्यताबलात् अन्वयप्रयोजकधर्मात्मकयोग्यतारूप
ज्ञानत्वज्ञानबलात। गुरुमतेशाब्दबोधविषयइत्यग्रिमेणान्वयः॥ श्रुतार्थापत्तिस्थले
दिवाभोजीपीनइत्याद्यन्वयप्रयोजकरात्रिभोजित्वबोधकपदंविनायोग्यताज्ञानाभा
वेनपीनत्वबोधोनुपपन्नइत्यनुपपत्तिज्ञानाधीनतद्बोधकपदकल्पनस्थलेशब्दादुपस्थि
तमितितन्मतेशब्दानुपस्थितस्यशाब्दबोधेभानाभावादितिभावः। इहापिघटज्ञानमि
त्यादावपिज्ञानत्वघटविषयत्वयोरितिनिरूपकत्वंषष्ठ्यर्थः तच्चज्ञानत्वस्याश्रयतयाघ २२

रा

टविषयकत्वस्यप्रतियोगितयातथाचज्ञानत्वस्यघटविषयकत्वातिप्रसक्त्येत्यर्थः। ज्ञानत्वस्य
शुद्धस्यघटविषयकत्वान्वयितावच्छेदकत्वासंभवेनेतिशेषः। घटत्वप्रकारकत्वघटविशेष्य
त्वयोरिति यद्यपिघटज्ञानमित्यत्रघटविशेष्यकत्वभानेतदन्वयितावच्छेदकभानापेक्षानतुघ
टत्वप्रकारकत्वरूपान्वयितावच्छेदकभानेअनवस्थानादितिअन्योन्यान्वयितावच्छेदकत्वाभि
धानमसंगतंतथापिघटत्वप्रकारकंज्ञानमित्यादिशाब्दबोधाभिप्रायेणघटविशेष्यकत्व
स्यघटत्वप्रकारकत्वान्वयितावच्छेदकत्वाभिधानंयद्यपिद्रव्यमित्यादिज्ञानेघटविशेष्य
कत्वंघटत्वप्रकारकत्वातिप्रसक्तंतथापिमिश्रादिमतेयथाघटत्वादिप्रकारकत्वेघटादिवि
पो शेष्यकत्वस्यबाधकत्वेपियोनियमोग्रेवक्ष्यमाणस्तथाप्रकृतेपिबाधकापोद्यएवनियमोए
रुमतेबोध्यः। योग्यताबलादिति। अन्वयप्रयोजकत्ववद्धर्मरूपयोग्यताज्ञानबलादित्य
र्थः। शाब्दबोधविषयत्वमस्तित्यग्रिमेणान्वयः तज्ज्ञानस्यतन्मतेशाब्दधीहेतुतयातस्ये
वस्वविषयान्वयप्रयोजकरूपभासकत्वादितिभावः। शब्दादुपस्थितयोरिति। अन्वयि
तावच्छेदकघटत्वप्रकारकत्वादिबोधककल्पितशब्देनोपस्थापितयोरित्यर्थः। बाधका
पोद्यइतिबाधकवशाद्विशेषणांतरमनंतर्भाव्यग्रहोविशेषणांतरांतर्भावेनग्राह्यइ
त्यर्थः। यद्यपिविशेषणंबाधकाभावएवतन्निवेशस्यावश्यकत्वेचघटत्वप्रकारकत्वा
शावैय्यर्थ्यंघटविशेष्यकत्वबाधकप्रमाणविरहस्यैवघटविशेष्यकत्वानतिप्रसक्तत

प्र·मि·टी·ग· यातत्वेनान्वयितावच्छेदकत्वसंभवात् तन्मात्रस्यतथाभानेनचनप्रामाण्यभाननिर्वाहस्तथापिघटत्व
प्रकारकत्वस्यघटविशेष्यकत्वेयद्यद्बाधकंतदभावाएवविशेषणंनतुप्रकारकज्ञानस्यतथात्वे
बाधकानामप्यभावात्।तथाचघटत्वप्रकारकत्वानिवेशेघटत्वाप्रकारकज्ञानेउक्तबाधकवि
२२ रहसत्त्वेनतदतिप्रसक्त्यातत्प्रकारकत्वनिवेशनस्यावश्यकतेतिभावः।यत्तुबाधकाप्रवेशो
बाधकावच्छेदेनदुर्ग्रहः तथाचबाधकव्यभिचारग्रहाभावदशायांशुद्धेपिघटत्वप्रकारकत्वेघ
टविशेष्यकत्वनियमग्रहसंभवेनान्वयितावच्छेदकतयातद्भानसंभवः अत्रप्रमासाधा
रणान्वयव्याप्यत्वग्रहविषयधर्मवत्ताज्ञानस्यैवशाब्दधीहेतुतयातादृशव्याप्यत्वग्रह
विषयस्यैवान्वयितावच्छेदकतयाभानादितिभावइतिव्याख्यानंतदसत्।अथबाधक
संभवइत्याद्यग्रिमग्रंथासंदर्भात्तथाहिबाधकसंभवइत्यस्यनियमग्रहप्रतिबंधकव्य
भिचारावतारइत्येतदर्थकतायाएवैतन्मतेस्वीकरणीयतयाअप्रामाण्याग्राहकत्वमेव
सामग्र्याअसिद्धमितिनसंगच्छतेघटत्वप्रकारकत्वेभ्रमांतर्भावेणघटविशेष्यकत्वव्य
भिचारज्ञानकालेभ्रमेप्रामाण्यविरोधिनोघटाविशेष्यकत्वस्यग्रहनियमेपिप्रमात्वा
श्रयघटज्ञानेशाब्दबोधेनगृह्यमाणेप्रमात्वविरोधिग्रहानियमात्बाधस्यदुर्वारत्वात्
अस्मन्मतेचतदत्रयदिबाधकानवतारइत्यादिग्रंथएवंव्याख्येयः।यदिघटविशेष्यक
त्वबाधकस्यशाब्दबोधग्राह्यघटज्ञानेनावतारस्तदाप्रतिबंधकाभावेनबाधकाभावस २२

हितंघटत्वप्रकारत्वरूपमन्वयितावच्छेदकंशाब्दबोधेनतत्रावगाह्यतएवेतिप्रामाण्यग्राहकत्वंतत्रा
क्षतमेवअथयदितादृशघटज्ञानेघटविशेष्यकत्वबाधकग्रहोपिवर्ततेतदातादृशबाधकस्यै
वप्रामाण्यविरुद्धस्यतत्रज्ञानेअवगाहनेनतज्ज्ञानेप्रामाण्यविरोधिग्रहासमवहितत्वरूपत
ज्ज्ञानेप्रामाण्यविरोध्यग्राहकत्वंसामग्र्याअसिद्धमितिनबाधावकाशइतिनचघटविशेष्य
कत्वबाधकस्यतत्रग्रहदशायांघटविशेष्यकत्वमेवतत्रनभासितुमीष्टेइतिसविषयज्ञा
नग्राहकसामग्र्याएवासंभवइतितादृशसामग्र्याअप्रामाण्याग्राहकत्वासिद्धिकथनंवि
रोधइतिवाच्यं।घटविशेष्यकत्वबाधकस्यवस्तुगत्यातदभावव्याप्यस्यतदभावव्याप्य
त्वेनाग्रहदशायांग्रहेघटविशेष्यकत्वेनज्ञानभानसंभवात्नियमावधारणंनास्तीतिनच
यदाघटत्वप्रकारकत्वेघटविशेष्यकत्वनियमावधारणंनास्तितदायोग्यताज्ञानाभावाच्छा
ब्दबोधएवनजायतइतिनबाधप्रसक्तिरितिवाच्यं।प्रमात्मकस्यापिभ्रमरूपस्यवानियमग्रह
स्यविषयीभूतधर्मांतरज्ञानादेवशाब्दबोधसंभवात् अन्वयितावच्छेदकस्ययोग्यताबला
नुमानमभ्युपगच्छतापिइतरकोटिबाधनिश्चयस्यतदभासकत्वमुपेयतेघटेनजलमाहरे
त्यादौछिद्रेतरबाधबलादेवाच्छिद्रत्वलाभात् इतरबाधश्चकोट्यंतरवतिसमभिव्याहृतान
न्वयनिश्चयः समभिव्याहृतान्वयिनिकोट्यंतरविरहनिश्चयश्चएवंचघटेनजलमाह
रेत्यादौछिद्रघटेनजलाहरणसाधनंजलाहरणसाधनंघटेनछिद्रइतिबाधनिश्चयः

श्चयः २

कृ·मि·टी·ग· छिद्रेतरत्वभासकः नचार्थाध्याहारवादिनां अध्याहृतार्थांतरस्यैव अन्वयप्रयोजकरूपस्या
पिभानेनेतरबाधापेक्षा अविशेषात् भट्टमतेपि पदकल्पमात्रद्वो ध पदार्थांतरस्यैवान्वय
प्रयोजकरूपस्यापिभानेनेतरबाधापेक्षेतिवाच्यं। अन्वयप्रयोजकरूपस्यान्वयितावच्
२४ छेदकतयाभानेतदंशेतात्पर्यग्राहानपेक्षार्थांतरभानेचतदपेक्षेतिविशेषादन्वयप्रयोज
करूपस्येतरंबाधसापेक्षग्रहकत्वसंभवादित्याशयेनाह। किंचेति। नतत्संशयेनेतर
बाधानिश्चये· प्रशस्तेतिगोरत्वादेः प्रशस्तरूपान्वयानियतत्वेग्रहेपिगोरत्वादीतररूपा
भावानिश्चयदशायांप्रशस्तरूपवान्मैत्रइत्यादिशब्दात् गौरोमैत्रः॥ प्रशस्तरूपवा
नित्याद्याकारकशाब्दबोधापत्तेरित्यर्थः। तदुत्तरंच गौरोनवामैत्रइत्यादिसंशयेनेष्टा
पत्त्यसंभवइतिभावः नचतत्रशाब्दबोधात्पूर्वं गौरत्वादेर्धर्मिण्ययोग्यताज्ञानमेवना
स्तितद्ग्रहस्थलेचशाब्दबोधानंतरंगोरत्वादिसंशयोनभवत्येवेतिवाच्यं अन्वयस्यानु
मेयतावारणायसंशयसाधारणमेवान्वयप्रयोजकरूपवत्ताज्ञानंहेतुः तथाच धर्मिणि
गोरत्वाद्यनिश्चयेपि संशयात् शाब्दबोधोत्पत्त्यातत्रशाब्दबोधे गोरत्वादिभानेतदुत्तर
मनुभवसिद्धस्य गोरत्वादिसंशयस्य दुरपह्नवस्यानुपपत्तेर्दुर्वारत्वात् बाधसंशय इत्य
र्थः। अन्वयप्रयोजकरूपस्यानिश्चयः शाब्दहेतुरितिमतेनैषदोष इत्यतआहापिचे
ति। प्रकारांतराभावात् घटविषयकज्ञानत्वादिमात्रेण व्यापकतावगाहिग्रहजन्या

नुमितौ घटत्वादिप्रकारकत्वाभानस्य उपायांतराभावात् तथाचतत्रेति प्रामाण्याभा
नेनेतिशेषः तज्ज्ञानप्रकारेति प्रकृतप्रामाण्यघटकरजतत्वादिरूपप्रकारेत्यर्थः। तत्
ज्ञानविशेष्येति प्रकृतप्रामाण्यघटकरजतादिरूपविशेष्येत्यर्थः। तज्ज्ञानोल्लिखितप्रकार
विशिष्टेति प्रकृतप्रामाण्यघटकरजतत्वादिप्रकारविशिष्टेत्यर्थः। रजतत्वादेर्विशेषणत्वंच ज्ञान
विषयतान्वयात् नोदर्शनेनैयायिकानांमतेतादृशसामग्र्या रजतत्वादिविशिष्टविशेष्यकत्व
रजतत्वादिप्रकारकत्वाभ्यां ज्ञानग्राहिकया सामग्र्याप्रामाण्याग्रहः रजतत्वारिमतीत्यादिप्रामा
ण्यस्याग्रहः तावन्मात्रस्य प्रामाण्यशरीरत्वादितिभावः॥ अधिकस्यतद्घटकत्वेचतादृशसामग्री
विलक्षणेपितादृशानुमित्यादिसामग्रीभिरपिकाश्चित्प्रामाण्याग्रहेणबाधएवदुर्वारः। तदग्राह
कत्वेनापिसामग्रीविशेषणेपुनः सिद्धसाधनमितिध्येयं शब्देनेत्युपलक्षणं प्रमेयविशेष्यकघ
टत्वप्रकारकज्ञानत्वग्राहकानुमानादिनापीत्यपिद्रष्टव्यं वस्तुतोघटविशेष्यकेइति वस्तुगत्याघटविशे
ष्यकघटत्वप्रकारकत्वरूपप्रामाण्याश्रयज्ञानइत्यर्थः घटविशेष्यकत्वंवस्तुगत्यायोघटःप्रमेयत्व
विशिष्टस्तद्विशेष्यकत्वमित्यर्थः। प्रामाण्याग्रहेणेति विशेष्यांशेघटत्ववत्त्वघटितविशिष्टप्रामा
ण्याग्रहेणेत्यर्थः पूर्ववदिति घटविषयकत्वादिमात्रग्राहकोक्तसामग्र्याप्रामाण्याग्रहाधीनबाध
वदित्यर्थः कस्याश्चित्सामग्र्यामिति किंचित्सामग्रीजन्यज्ञानइत्यर्थः विषयग्रहनियमः ज्ञानवि
शेषणतयाविषयभानेनैयत्यं तंत्रं तादृशविषयभाननियतं विषयविनिर्मुक्तेति विषयाविषय
केत्यर्थकज्ञानग्राहान्वयिविषयपदं प्रकृतप्रामाण्याश्रयज्ञानविषयार्थकं तेनज्ञानत्वादेर्विषयत्वे

 पिनाप्रसिद्धिः गुरुमते ज्ञानादेरपि तादृशज्ञानविषयतया प्रमेयत्ववति प्रमेयत्वप्रकारकत्वाद्याश्र
यभानेन सर्वमतएव ज्ञानादेर्विषयतयाऽप्रसिद्धिर्दुर्वारैवेति यथाश्रुतार्थासंगतेरुक्तं विवृणोति
विषयांकितमेवेति विषयविषयकत्वोपरक्तमेवेत्यर्थः एवकारार्थस्पष्टयति विषयमिति ज्ञा
 नरूपधर्मिग्रहे ज्ञानरूपविशेष्यग्रहे विषयविषयकत्वविशेष्यतानवच्छिन्नज्ञानविषयताशा
लिग्रहे न समर्थेति समुदितार्थः तद्ग्राह्यत्वं तादृशीया ज्ञानग्राहिका सामग्री तद्ग्राह्यत्वं शब्दे
घटज्ञानमित्यादिवाक्यस्थले तादृशी सामग्र्येव नास्तीति ज्ञानभानप्रयोजकसामग्री तादृश्येव
न भवतीत्यर्थः नहि तत्रेति तादृशशब्दस्थले ज्ञानभानप्रयोजकसामग्री न घटोपरक्तज्ञानमा
त्रबोधकपदघटितेत्यर्थः घटज्ञानशब्दस्याखंडस्य पदत्वाभावादिति भावः ननु घटज्ञान
पदयोर्भेदेपि तत्र घटपदसाहितज्ञानपदत्वेन ज्ञानभानप्रयोजकत्वात्तादृशज्ञानपदस्य विष
यानुपरक्तज्ञानभानासमर्थत्वान्न तादृशशब्दसामग्रीवारणसंभव इत्यत आह घटप
दं विनापीति ज्ञानपदार्थोपस्थापकत्वेन ज्ञानरूपार्थभासकत्वेन तावन्मात्रस्य केवलज्ञा
नपदत्वावच्छिन्नस्य सामग्रीत्वात् ज्ञानभानप्रयोजकसामग्रीघटकत्वात् तथा च तद्रूपावच्छि
न्नस्य विषयानुपरक्तज्ञानग्रहसमर्थतया तद्घटितसामग्र्या व्युदासः यद्यपि तद्घटकयोग्यता
ज्ञानविशेषादेर्विषयानुपरक्तज्ञानग्रहासमर्थत्वमक्षतं तथापि ज्ञानपदादेरतथात्वान्न सा
मग्र्यास्तथात्वमिति भावः ननु ग्राहकसामग्रीपदं यदि ज्ञानविषयितावच्छिन्नकार्यतानिरूपि
ज्ञान

तकारणताश्रयरूपज्ञानाभानप्रयोजककारणसमुदायपरं तदात्वङ्मनोयोगादिरूपकारणा
नामतथात्वेन तदसमवहितव्यवसायादिरूपानुव्यवसायादिहेतुसमुदायस्यापि यावदंतर्गतत
याया वत्तादृशसामग्रीग्राह्यत्वाप्रसिद्धिः यदि ज्ञानग्रहात्मकयत्किंचिद्व्यक्तिनिष्ठकार्यतानिरू
पितकारणताश्रयसमुदायपरं तदानुव्यवसायादिसामग्रीघटकात्ममनोयोगादीनां सामान्य
रूपेण विषयानवच्छिन्नज्ञानग्रहं प्रत्यपि स्वरूपयोग्यतया विषयानुपरक्तज्ञानग्रहस्वरूपायो
ग्यतादृशसामग्र्यप्रसिद्धिः समर्थपदस्य फलोपहितार्थकत्वे घटज्ञानमित्याकारकशाब्दबो
धाद्युपधायकज्ञानपदोपस्थित्यादीनां विषयानवच्छिन्नज्ञानग्रहानुपधायकत्वाद्बाध एवेति क
थमुक्तविवक्षासंभव इत्यत आह तत्फलोपधाननियतहेतोरेवेति विषयानवच्छिन्नज्ञानग्र
हे यद्व्रहनिष्ठज्ञानविषयिताप्रयोजककारणसमुदायः स्वरूपायोग्यः ज्ञानविषयकतद्ग्रहोपा
दानात्तत्रैव यावत्त्वविशेषणोचितत्वेन सामग्र्युपादानस्य शिरोवेष्टनेन नासिकास्पर्शतुल्यता
पातादिति भावः ननु घटज्ञानवान् घटेच्छावत्वादित्याद्यनुमानेन प्रामाण्याग्रहाद्बाध उक्त
विवक्षयापि दुर्वारः तादृशानुमितिसामग्रीघटकज्ञानभासकपरामर्शासिद्ध्यभावादीनां
विषयानवच्छिन्नज्ञानग्रहायोग्यत्वात् यदि च ज्ञानसामान्याभाववत्तानिश्चयाभावस्य ता
दृशानुमितिसामग्रीघटकस्य विषयानवच्छिन्नज्ञानग्रहं प्रत्यपि जनकत्वात्तादृशसामग्री
व्याहतिरित्युच्यते तदापि ज्ञानं घटीयं घटसन्निकर्षजन्यत्वादित्यनुमानेन प्रामाण्याग्रहाद्बा

 ग्रोदुर्वारएवयदिचात्मांशोज्ञानवत्वावगाहिसामग्रींनिवेश्यतादृशाबाधोवार्यतेतथापिभट्टमता
परिग्रहोदुर्वारः ज्ञाततालिंगकपरामर्शघटितसामग्र्याविषयानवच्छिन्नज्ञानवत्वभासकज्ञानसामा
न्याभावत्वनिश्चयाभावघटितत्वात् एवंज्ञानत्वादिप्रकारकव्यवसायप्रामाण्यग्राहकतदनुव्यव
२८ सायसामग्रीघटकस्यज्ञानमित्यादिव्यवसायस्यविषयविषयितानवच्छिन्नविषयीभूतज्ञान
निष्ठविषयताकंज्ञानंजानामीत्याद्यनुव्यवसायंप्रतिजनकतयातत्सामग्रीमादायसाध्यसत्वेता
दृशाप्रामाण्येदुरुपपादं विषयविषयितावच्छिन्नज्ञानविषयिताशून्यग्रहाजनकत्वनिवेशेता
दृशानुव्यवसायस्यतथाविधज्ञानविषयकव्यवसायनिष्ठविषयिताकत्वेनतज्जनकत्वमादा
यदोषासंभवेपितादृशाव्यवसायस्यज्ञानवानित्युपनीतभानशाब्दबोधादिकंप्रतिजनकतया ग्यग्राह्यतयाबाधकस्तूच्यते ॥
तदघटितानुव्यवसायसामग्र्यसंग्रहोदुर्वारएव यदिपदग्रहनिष्ठज्ञानविषयितावच्छिन्नका
र्यतानिरूपितकारणतावच्छेदकीभूतायावंतोधर्मापदग्रहनिष्ठविषयविषयितावच्छिन्नत्व
विशेषितज्ञानविषयितावच्छिन्नकार्यतानिरूपिताकारणतावच्छेदकाः तादृशाग्रहसामग्रीवि
वक्षणान्नायंदोषः ज्ञानमित्याकारकव्यवसायनिरूपिततज्जदनुव्यवसायनिष्ठजन्य
तायांज्ञानरूपविषयविषयितावच्छिन्नत्वेनज्ञानविषयितायाअवच्छेदकत्वात् घटज्ञा
नमित्यादिशाब्दबोधनिष्ठायाज्ञानपदोपस्थितिनिरूपितायाः तज्जन्यज्ञानोपस्थितिनिरू
पितायावाजन्यतायाविषयविषयितावच्छिन्नत्वेनज्ञानविषयतानवच्छिन्नत्वान्नतादृशाशाब्दबोधसाम

तदनुव्यवसायनिष्ठमनःसंयुक्तसमवायजन्यतायाआत्मसमवेतमानसत्वावच्छिन्नाया
विषयविषयितावच्छिन्नत्वेन न ज्ञानविषयितावच्छिन्नतयाअनुव्यवसायसामग्र्याअसंग्र
हइत्यस्तुकल्पेअनुशयात् ज्ञानग्राहकताप्रयुक्तविषयग्राहकताकत्वमेवसामग्र्यांनि
वेश्यमित्याशयेनघटज्ञानमित्यादौघटपदादेरेवविषयभानप्रयोजकत्वंनतुज्ञानग्रा
हकत्वस्येत्याह तथाचेति ज्ञानभासकज्ञानपदस्यघटानुभरक्तज्ञानभासकत्वंचेत्यर्थः
यद्येनविनेतियादृशज्ञानेयेनविनायन्नभासतेतदीयग्राहकतायास्तद्ग्राहकताप्रयुक्तत्वा
दित्यर्थः ननुकिमिदंप्रयुक्तत्वंनावच्छिन्नत्वंमिश्रमतेव्यवसायादेस्तन्नद्विषयकज्ञानत्वा
द्विनैवविषयग्रहजनकत्वाज्ज्ञानग्राहकतायास्तदनवच्छेदकत्वात् गुरुमतेपिविषय
ग्राहकत्वेनैवतज्ज्ञानग्राहकतायावैपरीत्यान्नाप्यवच्छेदकत्वंअनुव्यवसायसामग्र्या
मनःसंयुक्तसमवायादिरूपायामनःसंयुक्तसमवायात्वादिनैवज्ञानग्राहकत्वात्
विषयग्राहककतायास्तदनवच्छेदकत्वात् नापिव्यापकत्वंमनःसंयुक्तसमवायादे
र्ज्ञानग्राहकस्यविषयाग्राहकस्यविषयाग्राहकत्वात् अनुव्यवसायसामग्र्यांविष
यग्राहकतायाज्ञानग्राहकताव्यापकत्वात्नत्वमनःसंयुक्तसमवायादेर्विषयो

प्र·मि·टी·ग· पराग्रेणैवज्ञानग्राहकतयाविषयग्राहकत्वमप्यक्षतमितिवाच्यं एवंसतिघटज्ञान
२७ वानित्याद्यनुमितिसामग्रीघटकज्ञानग्राहकपरामर्षादेरिवतादृशज्ञानाभाववताति
श्वयाभावादेरपिविषयविषयकज्ञानानुमितिजनकतयाविषयग्राहकत्वाक्षतेस्ता
दृशसामग्र्याअव्यावृत्तेः विषयविषयितावच्छिन्नकार्यतानिरूपकत्वस्यविषयग्राह
=मानसत्वं= कतारूपत्वेस्फुरत्वादिप्रत्यक्षसाधारणधर्मावच्छिन्नजनकेमनःसंयुक्तसमवायादौतदनु
पपत्तेः नापिव्याप्यत्वंतद्विषयग्राहकतात्वेनयेनकेनापिरूपेणवाप्रकृतसामग्रीघटक
वृत्तित्वंविशिष्टविषयग्राहकतात्वेनवानाद्यः विषयग्राहकतायाविषयचक्षुःसन्निक
र्षादौसत्वात्तत्रचमिश्रमतेज्ञानग्राहकताविरहेणाव्यभिचारान्नद्वितीयः प्रमापदादि
निष्ठविषयग्राहकतात्वेनज्ञानग्राहकताव्याप्यत्वसत्वात्तादृशज्ञानग्राहकताश्रयज्ञा
नपदादिघटितसामग्र्यग्राह्यत्वेनबाधस्यदुर्वारत्वात् नततीयः घटज्ञानवानित्याद्यनु
मितिसामग्रीघटकपरामर्शविशेषादिवृत्तित्वविशिष्टत्वेनविषयग्राहकतायाज्ञानग्रा
हकत्वव्याप्यत्वात् तादृशसामग्र्यग्राह्यत्वेनबाधस्यदुर्वारत्वात् नापितदवच्छेदकावच्छिन्न
त्वमुक्तपरामर्शादिनिष्ठज्ञानविषयग्राहकत्वयोः परामर्षविशेषत्वादिरूपैकावच्छिन्नतयात
दृघटितसामग्र्याअव्यावृत्तेः नापिस्वरूपसंबंधविशेषः निर्विशेषयोरेकसामग्रीनिष्ठज्ञान

विषयोविषयग्राहकतयोः प्रयोज्यप्रयोजकभावस्यानियमात्

(२)

मशक्यत्वादित्यनुपपत्तीरवलोक्यपर्यवसितार्थमाह तथाचेतिज्ञानग्राहिकैवेतिसामग्रीतिशेषः
ज्ञानभानप्रयोजकमेवविषयभानप्रयोजकमित्यर्थः विषयग्रहार्थमितियत्सामग्रीजन्यज्ञानेज्ञान
विशेषणतयाविषयभानंज्ञानविषयत्वाप्रयोजकाप्रयुक्तमित्यर्थः प्रयोजकत्वंस्वरूपसंबंधवि
शेषः कार्यतावच्छेदकधर्मवत्वेकारणविशेषादेस्तादृशप्रयोजकतयाअनुभवसिद्धत्वात् का
रणस्यप्रयोज्यत्वंकार्यतावच्छेदकस्यप्रयोजकतात्वंप्रतीपतइतिवैपरीत्याप्रसक्तेः स्वप्रकाश
सामग्रीजन्यज्ञानेविषयभानप्रयोजकविषयचक्षुःसन्निकर्षादिर्ज्ञानभानेपिप्रयोजकः अन्यस्य
ज्ञानाभासकत्वादितिविषयभानेज्ञानभानाप्रयोजकाप्रयुक्तत्वमक्षतमेव अनुव्यवसायेविष
यभानप्रयोजकोव्यवसायः सचज्ञानभानप्रयोजकोपिज्ञानग्रहंप्रतितस्यसामान्यतोविषय
त्वेनविशेषतश्चघटत्वप्रकारकघटविषयकज्ञानत्वादिनाहेतुत्वात् प्रयोजकत्वंचजनकज बा–
नकतावच्छेदकसाधारणंस्वरूपसंबंधविशेषः। अतोघटज्ञानवानित्याद्यनुमितौविषयभा
सकपरामर्शादिरूपकारणस्यज्ञानभासकत्वेपिपरामर्षव्यापकतावच्छेदकतयाविषयवि
षयित्वंविषयभानप्रयोजकंनतुतादृशज्ञानभानप्रयोजकंविषयानवच्छिन्नज्ञानेव्यापक
ताग्रहादिपिज्ञानानुमित्युत्पत्तेरितिविषयभानंज्ञानभानाप्रयोजकप्रयुक्तमेवेतिस्वयमे
ववक्ष्यतेयत्रविषयसहितंज्ञानमेवसाध्यतावच्छेदकंअयंघटज्ञानविषयः आत्माघट
ज्ञानसमवायीघटज्ञानवदात्मभिन्नोयमित्याद्यनुमितौतत्रसामग्रीवारणायज्ञानग्रा

प्र·मि·टी·ग· इकेतत्रात्मभुख्यविशेष्यतानिरूपितज्ञानविषयतानिरूपितविषयविषयताथाज्ञा
नभानाप्रयोजकाप्रयुक्तत्वंनिवेशनीयंज्ञानविषयताधर्मितावच्छेदकीयविषयताविल
क्षणाग्नाह्याअतोविषयोपरक्तज्ञानावछिन्नपक्षकरुछत्वेधर्मितावच्छेदकत्वेनपरामर्ष
२८ विषयतायाज्ञानविषयोभयभानप्रयोजकत्वेपिनक्षतिः पटज्ञानमित्यादिशाब्दबोधसा
मग्रीव्यावृत्तिः स्फुटैवविभिन्नपदयोर्जनकज्ञाननिष्ठविभिन्नतद्विषयतयोश्चपृथक्ज्ञानवि
षयाभानप्रयोजकत्वात् यद्यप्युक्तविवक्षायामपिविषयविशिष्टज्ञानवाचकतदादिपद
घटितयाविशिष्टज्ञानेआधुनिकसंकेतशालिपदांतरघटितयाचज्ञानगोचरशाब्दसा
मग्न्याप्रामाण्याग्रहोद्वाधोदुर्वारएववक्ष्यमाणाप्रमापदघटितसामग्न्याइवतुल्यप्रयोज
कप्रयुक्तज्ञानविषयोभयविषयताकशाब्दीजनकत्वात् यदिचैकयाशक्त्या एकसंकेते दधी
नचतदादिपदस्यविषयविशिष्टज्ञानभासकत्वेपितज्जन्यविशिष्टविषयकोपस्थितो
विषयविषयितायाः फलीभूतज्ञानेतद्विषयताप्रयोजकत्वंतत्रज्ञानविषयतायाश्चफलीभू
तज्ञानेतद्विषयताप्रयोजकत्वमितिनोभयविषयतयोस्तुल्यप्रयोजकप्रयुक्तत्वंतदा
प्रमापदघटितसामग्न्या अपितुल्ययुक्त्या असंग्रहः एवंतदवच्छिन्नकार्यतानिरूपित
कारणत्वतदवच्छेदकत्वाघनात्मकंस्वरूपसंबंधरूपंविषयताप्रयोजकत्वमप्यप्रा २८
माणिकंतथापिस्वनिरूपिकविषयविषयितानवच्छिन्नकारणताप्रतियोगिककार्य

प ग्रे

तावच्छेदिकायाविषयितातन्निरूपितप्रकृतप्रामाण्याश्रयविषयिताशालिग्रहसामग्र्येवज्ञानग्राहकसामग्रीपदे
नविवक्षणीयाइत्याशयः अनुव्यवसायनिष्ठज्ञानविषयितानिरूपितविशेष्यित्वप्रकारित्वविषयिताव्यव
सायजन्यतावच्छेदिका पुरोवर्तिविशेष्यकत्वावच्छिन्नघटत्वादिप्रकारकत्वंप्रकारितानिरूपितज्ञाननिष्ठलौकिक निरूपित
विषयिताशालिप्रत्यक्षत्वाद्यवच्छिन्नंप्रतिपुरोवर्तिविशेष्यघटकत्वप्रकारकज्ञानत्वादिनाव्यवसायस्यहेतुत्वात्तद
न्नीव्यवसायकारणताचनविशेष्यित्वादिविषयितावच्छिन्नातदवच्छेदककोटौविशेष्यतादेरेवप्रवेशात् तथा
चताद्दशीविशेष्यित्वादिविषयितैवतथाविधंस्वंतन्निरूपितज्ञानविशेष्यिताशालित्वंअनव्यवसायरूप
ज्ञानग्रहस्यासतंएवंगुरुमतेस्वप्रकाशरूपव्यवसायीयविशेष्यित्वादिविषयिताविनाद्दशांस्वंतस्याव्यवसायसा
मग्रीजन्यतावच्छेदकत्वात् ताद्दशसामग्रीनिष्ठकारणतावच्छेदककोटौचविशेष्यित्वादिवि
षयितायाअनिवेशात् अतस्तन्मतेव्यवसायसामग्र्याः संग्रहः एवंभट्टमतेप्रत्यक्षस्थज्ञानाभिषिक्तता
तताल्लिंगकानुमितेर्विषयिविषयितानवच्छिन्नधर्मतानत्वावच्छिन्नत्वात् ताद्दशविषयिताभादा
यतदनुमितेर्निरुक्तज्ञानविषयिताशालितयातत्सामग्रीपरिग्रहः इच्छादिलिंगकज्ञानानुमि
तौचपरामर्षादिनिष्ठयघटकारणतानिरूपितकार्यतावच्छेदकायद्विषयितातत्रत्कारण
तावच्छेदककोटौतत्रद्विषयविषयिताप्रवेशनस्यावश्यकतयानकापिविषयितात्ताद्दशांस्वमि
तितत्सामग्रीव्युदासः शाब्दबोधसामग्र्याअप्येवंरीत्याव्युदासोबोध्यः एवंसतिप्रमापदघटि
तसामग्र्याअसंग्रहेपिपृथिवीतिज्ञानेजातेइत्यादिरीत्यानुदीच्यानुव्यवसायेप्रामाण्यभानात्त
त्सामग्रीमादायसिद्धसाधनस्यवारकतयैवयावत्सदसार्थक्यंतत्रप्रामाण्यविषयितातःया

प्र·मि·टी·ग· तिन्याअलौकिकविशेष्यित्वादिविषयितायाविशेष्यित्वादिरूपविषयिविषयितावच्छिन्नज्ञान
सन्निकर्षनिरूपितजन्यतावच्छेदकायाः तादृशविषयविषयितानवच्छिन्नकारणतानिरूपित
२९ कार्यतानवच्छेदकत्वेपि पुरोवर्त्तिविशेष्यकव्यवसायजन्यतावच्छेदकविषयितायानिरुक्तकार्य
तावच्छेदकत्वात्तामादायतत्सामग्रीपरिग्रहात्उपनीतघटज्ञानविषयकपटज्ञानानुव्यवसाये
घटज्ञानविषयितानिरुक्तकार्यतावच्छेदकीभूतविशेष्यित्वादिविषयितानिरूपिता अपि
तुपटज्ञानीयालौकिकविषयतैव अतोनतत्सामग्र्यग्राह्यघटज्ञानप्रामाण्यबाधः यदि च प
टज्ञानानुव्यवसायविषयपटविषयकत्वाद्यंशेविशेषणतयाभासमानोपनीतघटज्ञानविष
यितामादायतत्रबाधः संभाव्यतेतदातत्कार्यतावच्छेदकत्वंनिरुक्तज्ञानविषयितायामपि
निवेश्यंउक्तस्थलेघटज्ञानविषयितानकार्यतावच्छेदिकेतिनदोषइतिकृतंपल्लवितेनज्ञान
ग्राहकत्वेनविषयग्राहकत्वमितिज्ञानभानाप्रयोजकाप्रयुक्तविषयविषयिताप्रयोजक
त्वमित्यर्थः तथाचवक्ष्यामइति· अयमाशयः विषयविषयकत्वानवच्छिन्नव्यापकता
विषयकएवज्ञाततालिंगकपरामर्शोविषयोपरक्तज्ञानभासकः अपूर्वघटादिव्यक्ति
रूपविषयविषयकत्वस्यप्रागज्ञानात् तेनरूपेणव्यापकतायादुर्ग्रहत्वात्· नचैवंव्य
वसायस्यचिरातीतत्वेपज्ञाततालिंगात्तज्ञानत्वावच्छिन्नसाध्यकपरामर्शात्वि
षयोपरक्तज्ञानग्रहप्रसंगः अनुव्यवसायस्थानाभिषिक्तज्ञानानुमितौविषयभान २९

स्यानुभविकत्वेपिकालांतरीयज्ञाततालिंगकानुमितौइच्छादिलिंगकतदनुमितावि वव्यापकताव
च्छेदकत्वग्रहाविषयादिभानस्यानुभवविरोधेनइष्टापत्त्ययोगादितिवाच्यंज्ञाततावैषयकलौकि
स्वभाव कप्रत्यक्षात्मकपरामर्शस्यैवतथानुभवेकल्पनात्व्यवसायस्यचिरातीतत्वेचतन्नाशेनतज्जन्यज्ञा
ततायाअपिनाशात्तदंशेलौकिकपरामर्शासंभवेनातिप्रसंगविरहात्कालांतरीणज्ञाततालिंगकवि
षयानुपरक्तज्ञानानुमित्यनुरोधेनज्ञाततालिंगकपरामर्शस्यप्रत्यक्षस्मरणादिसाधारणस्यका
रणत्वांतरमिष्टमेवव्यवसायस्यैवज्ञाततालिंगकशुद्धज्ञानत्वावच्छिन्नव्यापकत्वावगाहिप
रामर्शसहकारेणविषयोपरक्तज्ञानानुमितिहेतुताव्यवसायजन्यज्ञातताप्रत्यक्षपर्यंतंव्यवसा
यावस्थानासंभवेपिविषयीभूतघटादौज्ञातताप्रत्यक्षस्यापिपूर्वव्यवसायसमानाकारत
यातत्साधारणेनतत्तद्धर्म्मिविशेष्यकतद्धर्मप्रकारकज्ञानत्वेनतत्तद्धर्म्मिविशेष्यकत्वावच्छि संभवात्
न्नतत्तद्धर्मप्रकारकत्वप्रकारकज्ञानग्रहंप्रतिहेतुत्वोपगमात्॥नचकालांतरीणज्ञाततादि
विषयस्मरणाद्यात्मकतल्लिंगकविषयोपरक्तज्ञानसाध्यकपरामर्शजन्यतादृशज्ञानग्र
हेव्यवसायस्यव्यभिचारइतिवाच्यंप्रत्यक्षात्मकव्यापकतापरामर्शस्यापितत्रव्यभिचारेण
तद्वारीत्यैवव्यवसायस्यापिव्यभिचारवारणस्यसंभवात्॥ यादृशज्ञानग्रहेव्यवसायो
त्तरतृतीयक्षणस्यैवस्वाव्यवहितपूर्ववर्त्तितादृशव्यवसायवत्वसंबंधेनक्षणत्वेनहेतुताअ
तोज्ञाततालिंगकज्ञानानुमितिपूर्वक्षणेव्यवसायासत्वेपिनक्षतिरितितुनसत्ज्ञातताप्रत्यक्ष

प्र·मि·टी·ग· द्वितीयक्षणे व्याप्तिस्मरणविलंबेनानुमित्युत्पादासंभवात्तदनंतरक्षणे व्याप्तिस्मरणात्तदुत्तर
मेवानुमितिर्जन्यते इत्येवाभ्युपगंतव्यत्वात् व्यवसायोत्तरतृतीयक्षणस्य व्यवसायांतरानभ्युप
गमे हेतुत्वासंभवात् तदभ्युपगमे तस्यैव हेतुत्वौचित्यात् मद्विज्ञानयोगपद्यमुपगच्छतो भट्टस्य
३० ज्ञाततात्प्रत्यक्षसमकालमेव व्याप्तिस्मरणोपगमासंभवत्सत्स्फुच्यते। तदापि विशिष्टपराम
र्शविलंबेनानुमितिविलंबसंभवात् प्राभाकरैरेव उपनीतभानानंगीकर्तृभिर्ज्ञानद्वयस्यानुमि
तिहेतुत्वोपगमात् वस्तुतो लिंगज्ञानस्यैव व्याप्तिगौरवात् एतेन ज्ञाततोत्पत्तिक्षण एव व्याप्ति
स्मरणोपगमात् प्राथमिकज्ञाततात्प्रत्यक्षमेव व्याप्तिविशिष्टज्ञाततावगाहिपरामर्शरूपमित्य
८प पिनिरस्तं न च ज्ञाततविषयकप्रत्यक्षरूपपरामर्शस्योक्तस्वभावकल्पने पटादिज्ञानाहितज्ञातता
तोपि घटादिरूपविषयोपरक्तज्ञानग्रहापत्तिरिति तत्तद्विषयोपरक्तज्ञानग्रहे तद्विषयकव्यवसा
यस्य तदुत्तरकालविषयस्य वा हेतुत्वकल्पनमावश्यकमिति वाच्यं· तत्र धर्मिवृत्तितद्धर्मकारक
ज्ञाततविषयकप्रत्यक्षात्मकपरामर्शस्यैव तत्तद्धर्मिविषयकत्वावच्छिन्नतद्धर्मप्रकारकत्वोपर
क्तज्ञानग्राहकतास्वभावकल्पनादित्यलमधिकेन अनुव्यवसायसामग्र्या ज्ञानग्रहे विषयग्रहार्थ
मन्यापेक्षा नास्तीति व्युत्पादयति। ज्ञानरूपेति। तेनापि धर्मधर्मितद्वैशिष्ट्यानामनुव्यवसाये व्यव
सायात्मकतुल्यसामग्रीबलाज्ज्ञाने तत्प्रामाण्यभानमक्षतमित्यर्थ परतादृश मणिकारकथनेनापि अभिप्रा
यो विषयग्रहे ज्ञानग्राहकव्यवसायमात्रापेक्षेत्याशयः मणिकृतामिति शेषः सहकार्यंतरानुप्रवेशेन विषयग्रह इति ३०

[illegible]

तिरिक्तसहकारिसमवधानानपेक्षायामित्यर्थः॥ तदुपन्यासानर्हत्वादिति व्यवसायस्य तत्
द्विषयग्राहकत्वाभिधानानौचित्यादित्यर्थः॥ व्यवसायस्याविषयग्राहकस्य सत्वेपि स
हकार्यंतराभावेन तद्भानसंभवात् प्रामाण्यग्रहानुपपत्तेरिति भावः प्रामाण्यानिमि
तेः ज्ञानपक्षकप्रामाण्यसाध्यकानुमितेः ज्ञानग्राहकत्वेति ज्ञानविषयत्वाप्रयोज
काप्रयुक्तविषयविषयताकत्वाभावादित्यर्थः॥ तत्र ज्ञानभाने ज्ञानरूपपक्षांशे हेतु
मत्वभानस्य विषयभाने चलदृशोर्व्यापकतावच्छेदकत्वभानस्यासंभवात् प्रयोजकत्वादिति
भावः॥ तदनंतर्भावेनैव यावत्पदानंतर्भावेणापि अन्यथा तावत्पर्यंतानिवक्षयातादृ
शानुमितिसामग्र्यसंग्रहे इत्यर्थमपि सविषयज्ञानग्राहकत्वविवक्षणेपि प्रामाण्यानुमि
तेः तद्घटितत्प्रकारकत्वविशिष्टज्ञानत्वसाध्यकानुमितेः पक्षीकृतज्ञानग्राहिकाया
इति पक्षीकृतयज्ज्ञानसामानाधिकरण्यरूपव्यापकतावच्छेदककोटिप्रविष्टवैशिष्ट्यघट
कतया तद्विषयिकाया इत्यर्थः तद्ग्राहकत्वप्रयुक्ततद्विषयघटादिग्राहकतायाः इति तथा
विधाया ज्ञानविषयताततप्रयोजकव्यापकतावच्छेदकत्वेन भानमात्रप्रयुक्तविषयविष
यिताकाया इत्यर्थः॥ प्रकृतप्रामाण्यानाश्रयज्ञानस्य व्यापकतावच्छेदकघटकवैशिष्ट्यां

३०
१

प्र·मि·टी·ग· तर्भावेपि प्रकृतप्रामाण्याश्रयज्ञानविषयताप्रयोजकत्वं न व्यापकतावच्छेदकस्यैव ज्ञानस्य अपितु प
क्षीभूततादृशज्ञानांशे हेतुमत्त्वज्ञानस्यैवेति सिद्धसाधनवारणासंभव इत्याशंक्यानिराशाय वैशि
ष्ट्यघटकज्ञानस्य प्रकृतप्रामाण्याश्रयत्वं पक्षीकृतेत्यनेन दर्शितं नन्वेवं घटविषयकत्ववैशिष्ट्यज्ञा वि
३१ नत्वादेर्यत्र साध्यता तादृशानुमितिप्रामाण्यानु यत्राह दूषः तस्या अपि उक्तप्रामाण्यानुमि
तिव्यापकतावच्छेदकत्वज्ञानप्रयुक्तवैशिष्ट्यविषयतांशान्तर्गतज्ञानविषयताकत्वात्।। तथा
च तद्वारणाय आत्मांशे विशेषणतया या ज्ञानविषयता तदप्रयोजकत्वप्रयुक्तविषयविषयताक
त्वमवश्यमेव विवक्षणीयं।। तथा च न प्रामाण्यानुमितिमादाय सिद्धसाधनावकाश इत्यतः प्र
थमानुव्यवसायोपनीतविशेष्यताप्रकारिताविषयकप्रमाण्यं नीलज्ञानात्मकानुव्यवसायान्तरस्या
प्रमात्वमादाय सिद्धसाधनस्य वारकतया यावत्पदसार्थकतामाह किंचेति अनुव्यवसितप्राक्तनव्य
वसायस्य पुनरनुव्यवसायकाले विषयासत्त्वेन न संभवतीति व्यवसायान्तरमनुसरति पुनरिति।।
तत्रैव विषये इति पूर्वव्यवसायधर्मिविषयकव्यवसाये यत्प्रामाण्यं तत्पूर्वानुव्यवसायोपनीतधर्मिविष
यकत्वान्यस्वविषयधर्मिविषयकत्वघटितं तस्य स्वविषयधर्मिविषयकत्वानुपस्थित्या नस्वांशे उ
पनेयत्ववशात् ज्ञानसंभवइति धर्मिविषयकव्यवसायान्तरेऽनुधावनं तदनुपलक्षणं अनुमित्यु
पनीतप्रामाण्यविशिष्टज्ञानलौकिकप्रत्यक्षविषयत्वमादायापि सिद्धसाधनैर्बोध्यं न नु प्रामाण्य
ज्ञाने तत्र ज्ञानभानाप्रयोजकप्रामाण्यज्ञानमधिकमपेक्षितं तदनपेक्षणे तन्मतेपि यावदनुव्य
वसायैः प्रामाण्यग्रहस्य दुर्वारत्वात् तथा च प्रामाण्यभानान्तर्गतं विषयभानं तत्र ज्ञानभानाप्रयोज

कप्रयुक्तमेवेति तादृशसामग्र्या न विवक्षितसामग्र्यां रूपतेति नासिद्धसाधनावकाशः यदि च पुरोवर्तिनि
पृथिवीत्वप्रकारकज्ञानं प्रमेति प्रामाण्योपनीतज्ञानात्मकलौकिकप्रत्यक्षे प्रामाण्यविषयता बहिस्त्ता
पि विषयतावर्तते सा ज्ञानविषयताप्रयोजके हेतुमात्रप्रयोज्यैव तादृशविषयता चान्यायमतेपि पृथि
वीत्यादिप्रकारकयावदनुव्यवसायसाधारणत्वादिति तादृशमादाय तथोपनीतज्ञानसामग्र्या निरु
क्तसामग्र्या विशेषणाक्रान्ततया सिद्धसाधनं दुर्वारमेवेति मन्यते तदापि यत्र यावत्पूर्वं गृहीतं त
त्रैव तस्योपनयः अन्यत्रानुमानमेवेति प्राचीनमतेनानुव्यवसाये उपनीतप्रामाण्यज्ञानसंभवइ
तिनोक्तरीत्या सिद्धसाधनावकाशः न च पुरोवर्तिविशेष्यकत्वावच्छिन्नपृथिवीत्वप्रकारकत्व
त्वादिना प्रामाण्याश्रयज्ञानग्रहे सति तदुत्तरं प्रामाण्यत्वेन तत्र तदुपनीतभाने संभवतीति वाच्यं त
दुपनीतज्ञानसमये तस्य व्यवसायस्य विनाशेन तत्प्रत्यक्षासंभवादित्यालोच्य सादृशसामग्री
विशेषग्राह्यतामादाय यावदन्तर्भावे सिद्धसाधनं दर्शयति वस्तुतस्त्विति तुल्यसामग्र्येति
प्रमात्वविशिष्टगोचरैकशक्त्यादिरूपतुल्यप्रयोजकबलेनेत्यर्थः शब्दप्रतीतेः प्रमापदार्थी
नशाब्दबोधे भानात् प्रमापदघटितशाब्दसामग्रीतोपि ज्ञानवानित्याद्यनुमितिसामग्र्या
अवैलक्षण्येन बाधमाशंक्य सामग्रीवैलक्षण्यं व्युत्पादयन्निराकरोति न चेत्यादिना तुल्यसा
ज्ञान मग्र्यां तुल्यप्रयोजकवशेन उभयोर्विषययोः एकशक्तिवदिति शक्यतावच्छेदकैपिशाचेरूप
गमादिति भावः व्याप्तिव्यापकताया असंभवादिति इदमापाततः यथा विधेयांशे ज्ञान

प्र-मि-टी- नैभो परामर्शीयायाव्यापकत्वेन विलक्षणविषयतायाः प्रयोजकत्वं साध्यतावच्छेदकनिविष्टविष
ग- यतायाश्चान्यादृशं व्यापकतावच्छेदकत्वेन विषयत्वं तथा प्रामाण्यपदार्थानवेधीयामिथोविलक्ष
णज्ञानाविषयोभयतयोर्विशेषणाविधयाज्ञानाविषयतयोर्विषयताभेद एव प्रयोजकः अन्य
३२ थाप्रमाप्रदाद्दूषयाविशिष्टज्ञानविषयकत्वेनाम्नोविशिष्टसंकेतितशब्दोतरस्य चाविशेषेणप्रामा
ण्याग्राहकत्वद्घटितसामग्रीमादायबाधस्य दुर्वारत्वात् उक्तरीत्यातद्वारणेनेदृशीत्यासिद्ध री
साधनस्यापि प्रसंगसूतिदर्शितस्योपनीतमानस्यलौकिकत्वान्यमस्याप्रामाणिकतयाउपनीत
मा प्रामाण्याविशिष्टज्ञानलौकिकप्रत्यक्षस्याहततयास्विसाधनस्य वारणरूपं दर्शितप्रयोजन
मेवविवक्षितं न तु तदभाववतितत्प्रकारकत्वमात्रमित्यभिप्रायेण गुरुमते साध्याप्रसिद्धि
मात्रं कज्ञानत्वाघटितमप्रामाण्यमिहाविवक्षितमित्याशयेन निराकुरुते न चेत्यादिना अन्य
थेत्यादिति अन्यथा रव्यातिस्वनभ्युपगमेपि धर्मगृहीतासंसर्गकाप्रामाण्यग्राहकसामग्र्याअ
प्रामाण्याग्राहकत्वविशिष्टघूषणे न व्यावर्त्तनसंभवात्तद्व्यावर्त्तनस्य चावश्यकत्वा
दितिभावः ननु भ्रमत्वारोपकाले प्रमात्वाग्रह एव दुर्घटः प्रमात्वस्य प्रत्यक्षमभ्यु
पगछतां मीमांसकानां भ्रमत्वानां भ्रमत्वरूपप्रमात्वाभावव्याप्यधर्मज्ञानस्य प्र
मात्वप्रत्यक्षप्रतिबंधकत्वासंभवात् न्व लौकिकसंनिकर्षजन्यज्ञाने भ्रमतदभावव्याप्यवत्ता ३२

७ यवस्दोपादानवीजं अप्रामाण्यपदेनतदभाववतितत्प्रकारकज्ञानत्वमेव ७

३३

प्रतिबंधं गुरुमहमते तु प्रामाण्यं न लौकिकसंनिकर्षग्राह्यं मिश्रमते विशेष्यताप्रकारि
णयोस्तद्ग्राह्यत्वेपि प्रामाण्यघटकबाधाविषयाणां उपनयनादिव भानमिति सर्वम
तएव स्वतः प्रामाण्यभानमपि भ्रमत्वज्ञाननिवर्तनीयमेवेति वाच्यं ज्ञानविज्ञिवेद्यत्व
मद्वियेपायाद्दशावस्तुनोभानं दभानप्रयोजकसामग्र्या लौकिकसन्निकर्षघटितसा
मग्र्या विशेष्यतादृशं भ्रमयोदोषंबृंहितसामग्रीजन्यप्रामाण्यग्रहस्य भ्रमत्वारोपेण
तत्सामग्र्या वाप्रतिबंधायोगात् घटतां वा मिश्रभट्टमते कथंचिद्भ्रमत्वारोपकाले प्र
मात्वाग्रहः गुरुमते पुनः स्वतंत्रभ्रमत्वोपस्थितेर्व्यवसायरूपधर्मिज्ञानस्य च धर्मिणि वि
शेष्यनवगाहित्वेन व्यवसाये प्रमात्वग्रहप्रतिबंधकत्वं न संभवतिन वाव्यवसायसाम
ग्र्यादुर्लत्वमग्राहकांतदलेनेत्यत आह इदं त्विति आरोपविषयेति आरोपविषयस्य
योसाधारणधर्मविशेषः स न गृह्यत इत्यर्थः तेन शंखादौपीतिमाद्यारोपदशायां श्वे
त्यादिवत् शंखत्वादेर्ग्रहविरहेपि न क्षतिः तादृशधर्माग्रहश्च आरोपकेन कस्येण अ
प्रतिबंधादिति भावः अप्रामाण्यासंसर्गाग्रहे आगृहीताप्रामाण्यासंसर्गकव्यवसाय
रूपधर्मिविषयज्ञानादिरूपाप्रामाण्यभ्रमे प्रामाण्यग्रहः प्रामाण्यत्वाभानं तथा च तत्
दग्राह्यतयाबाधवारणायाग्राहकांतं विशेषणमिति भावः अप्रामाण्याग्राहकत्वं अप्रा
माण्यग्राहाजनकत्वरूपं सामग्र्यां विशेषणं अप्रामाण्याविषयकत्वरूपं तज्ज्ञानविशेषणं वाउभय

प्र॰मि॰टी॰ग्र॰ यैव गुरुमते इदं ज्ञानमप्रमेत्यारोपान्तर्गतज्ञानेसामग्र्यानव्याप्तिः तादृशधर्मिज्ञानस्याप्रा
माण्याविषयकत्वात् इति यथाश्रुते वक्ष्यमाणानुपपत्तिर्ग्राहकां तमन्यथाव्याचष्टे अ
प्रामाण्येति अप्रामाण्यग्राहकसामग्र्यासमवहितत्वमिति अत्र सामग्र्यं तेनाप्रामाण्य
३२ भ्रमजनकदोष एव विवक्षितः यथाश्रुते अप्रामाण्यस्मृतिव्यवसायरूपज्ञानानुभवाल्प
कज्ञानरूपभ्रमसामग्र्योः कमिकतया तादृशज्ञानानुभवसामग्र्या अप्रामाण्यग्राहकसा
मग्र्यसमवहितत्वस्य दुर्वारतया तद्व्याप्त्यसंभवात् तादृशश्च दोषोननुगततल्लक्षणासंबंध
रूपोननुगताप्रामाण्योपस्थितिरूपो वा परमते प्रामाण्यग्रहप्रतिबंधकः अनुगताया अ
प्रामाण्योपस्थितेः स्वतः प्रामाण्यग्रहविरोधित्वम् अत्र व्यवसायरूपधर्मिज्ञानतदनंतरजा
ताप्रामाण्यस्मृतिरूपज्ञानद्वयम् अप्रामाण्यभ्रमस्तत्र व्यवसायपूर्वमुक्तप्रतिबंधकासत्वे
न व्यवसाये प्रामाण्यभासः एतेन तदुत्तरं व्यवसायरूपधर्म्यगृहीतासंसर्गकाप्रामाण्य
स्मृतिरूपतद्भ्रमानुपपत्तिः प्रागनुपस्थिताप्रामाण्यकज्ञानग्रहस्थलेपि प्रामाण्यसंश
यानुपपत्तिवत् तन्मते दोष एव अत उक्तस्थले विपर्ययानुरोधेन प्रामाण्याग्रहस्यावश्योपेय
तया बाध इति निरस्तं अप्रामाण्यग्राहकत्वस्यासंभवादिति ज्ञानानुभवेप्रामाण्यविषयकत्वस्या
तत्सामग्र्यां चाप्रामाण्यज्ञानजनकत्वस्यासंभवादिति अर्थः इत्यत्रापीत्यपिः प्रामाण्यग्रहेयोत्सतरं
उक्तविशेषणम् इति पूरयित्वा तदुत्तरं योजनीयः यत्र यादृशसामग्र्यां अप्रामाण्यज्ञानप्रामाण्यग्रहः इ ३२

त्वादिधर्मिकाप्रामाण्यप्रकारकप्रमायां अप्रामाण्यग्राहकत्वं तादृशग्रहस्य तादृश्यां ग्रहसाम
ग्र्यां अप्रामाण्याग्रहग्राहकत्वनिरूपकाग्राहकांतविशेषणं अप्रसिद्धं अनुपपन्नं तद्वारणाय
तदनुपपत्तिवारणाय पश्चात् भूते अप्रामाण्यरूपप्रकारघटितप्रामाण्ये साध्यासत्ववारणा
येति यावत् तत्सद्भिन्नत्वेनान्वयः तत्राप्रामाण्यग्राहकत्वमिति प्रकृतप्रामाण्याश्रयीभूत
ज्ञाने योप्रामाण्यग्रहस्तदजनकत्वमित्यर्थः लभ्यत इति ग्राहकांतेन सप्तमीतत्पुरुषाश्रय
णादिति भावः तावता उक्तसामग्र्याः संग्रहं विवृणोति इयांस्त्विति सामग्र्योर्विशेषः यत्र अप्रा
माण्यप्रकारकप्रमायां प्रामाण्यं अप्रामाण्यप्रकारकत्वघटितप्रामाण्यं गृहीतं तत्र
ग्राह्यप्रामाण्याश्रयतादृशज्ञाने अप्रामाण्यं घटत्वाद्यभाववति घटत्वादिप्रकारकरूपं
प्रकृतप्रामाण्यघटकीभूतमप्यप्रामाण्याग्रहादितीत्यनुषंगेणान्वयः तद्विषये तादृशाप्रा
माण्यप्रमायाविशेष्ये व्यधिकरणघटत्वादिप्रकारके इत्यादौ अप्रामाण्यवत्त्वस्याप्रा
ण्यप्रकारकत्वघटकतया अप्रामाण्यं गृहीतमित्यनुषज्यते॥ अन्येषाम् प्रामाण्यपदे
न तत्सदस्य षष्ठीसमासम् अवलंब्य व्याख्यां दूषयति तस्येति तन्मते गुरुमते धर्मस्य ज्ञाने
संबंधस्य व्यधिकरणप्रकारकत्वरूपाप्रामाण्यबाधितत्वात् साध्याप्रसिद्धेरिति शेषः
इदमुपलक्षणं मिश्रादिमतेपि घटत्वादिप्रकारकत्वघटिताप्रामाण्यस्य तादृशाप्रामाण्यघ
टितप्रामाण्याश्रयसमूहालंबनरूपघटत्वादिप्रकारभ्रमसाधारणतयाग्राह्यप्रामाण्या
श्रयज्ञानीयाप्रामाण्ये ग्राहकत्वस्य उक्तप्रामाण्यग्राहकसामग्र्यां दुरुपपादत्वादिस

स्वजन्यतनद्विषयकत्वोभयाभाववदप्रामाण्यग्रहसामान्य

प्र.कि.टीप. पिबोध्यं ॥ यत्रज्ञाने अप्रामाण्यासंसर्गाग्रहः । तद्रूपाप्रामाण्यभ्रमस्तत्राप्रामाण्याग्रहेण
तद्विशेष्यकाप्रामाण्यग्रहप्रसिध्यात दोषतादवस्थ्यं । साध्याप्रसिद्धितावदवस्थैव स्वजन्याप्रा
माण्यग्रहविषयतत्वकत्वविवक्षया अप्रसिध्युद्धारेपि अप्रामाण्यभ्रमसामग्र्यामपि तादृशवि
३४ शेषणासत्वेन बाधो बोध्यः तेनागृहीतासंसर्गकाप्रामाण्यतितेनसमं अगृहीत; तत्रागृही
तद्गृतियावत तादृशोसंसर्गोयस्यतादृशाप्रामाण्यत्वमर्थः अथागृहीतासंसर्गकत्वस्याप्रामा
६त ण्यत्वेपिनः ससम्यर्थत्वेस्यषष्ठ्यर्थतापि संभवतीति षष्ठीसमासः एवंश्रेयान् एवमसंसर्गाग्र
x मासपरीत्यागोयुक्तः वस्तुतः कारकविभक्तेः ससम्या अर्थो अप्रामाण्ये क्रियानात्मकेनान्व
तुमर्हति अपितु शेषषष्ठ्यर्थ एवेति षष्ठीसमासः x ग्रेरुस्यसप्तम्यर्थत्वेदंड पुरुषाविति
समूहालंबनस्यज्ञानद्वयस्यवासवस्थले पुरुषे दंडं जानातीतिप्रयोगापत्तिः एवंप्रकृतेतदगृही
तासंसर्गकाप्रामाण्याग्राहकत्वनिवेशे यत्राप्रामाण्यग्रहदशायां तत्रज्ञानतद्विषयीभूतस्याप्रामा
ण्यासंसर्गोनगृहीतः तादृशसामग्र्याश्चासंग्रह इतिचेत् सत्यं असंसर्गाग्रहपदेनात्रविशेष्यविशे
षणभावत्रूपा आकांक्षा एवविवक्षिता तेनागृहीतेत्यादेरपि तन्निष्ठविषयताप्रतियोगिकवि
शेषणतानिरूपकोयोप्रामाण्यग्रहस्तज्जनकदोषासमवहितत्वमर्थः तादृशविशेषणा
तानिरूपकत्वंवाप्रामाण्यविषयकत्वावच्छेदनविवक्षितं तन्निष्ठविशेषणतानिरूपकत्व
मेवज्ञाने तद्विषयकत्वावच्छिन्नं तेनाप्रामाण्यघटितप्रामाण्यग्रहस्यतादृशाप्रामाण्याश्रयत्वा